परिभाषेन्दुशेखर ~~टीका~~

व्याख्या चित्प्रभाख्या

१००

१३५ पत्राणि

(अपूर्ण)

ॐश्रीगणेशायनमः॥विद्याधीशंत्रिनेत्रंविमलमतियुतं।वैद्यनाथाभिधेयम्।जन्मास्थित्यंतकारिणिनिखिलजनिमतांय
श्चक्षज्यःसुरेशैः॥आनंदाब्धिर्महेशःसकललकलितनोदुर्गमोबोधहीनैःसमयज्ञानसह्योविगतपरिमितिलिंनमामोगिरीशं
पशास्त्रायोभियत्नेचकितमतिशयंनिष्कलंकोप्यबाधोपसस्यसत्याभवाब्धिंतरतिगतिमलाशुद्धंसंविकृतात्मा॥तंश्रीकाले।
दपेशंनिगमनुतिचरंवंधनंप्राणराशेर्थापनमामश्चरितकलुषहंस्रग्धरंवैराग्यमंतम् २पांशक्तिंसमुपास्तेहिविबुधादे
वेन्द्ररुद्रारपोपसार्थ।शंसहस्रं—फणिभृच्छक्रोनव—गुणाम्॥पस्यावेदवचांसितन्वमवलंशक्रान्यवनंगुणांध्याये—
निम्नगरौलनिरंतांयाभातिभाग्यावलिम्॥३॥चितदुरितसमूहंहंगणेशंजितमंधीरंमुनीनिलपसंगसन्नियानाहिपरमपा
करुनेनमोहिपलं॥४॥चित्रभानामिकां—स्यांपरिभाषेंदुशेखरे॥बालानामुपकारायकुर्वेभाष्यप्रदर्शिकाम्॥स्वचिकीर्षि
तनिवंधनसमाप्तिप्रतिवंधक दुरितप्रशमायशिष्टाचारप्रतिपालनायचशिष्टाचारानुमितस्मृतिप्रमाणकनिखि
लजगद्गुरुश्रीपरमेश्वरनत्यात्मकमंगलमाचरन्स्वचिकीर्षितंप्रतिजानीते॥नत्वेत्यादिना॥तत्रचतुष्टपिशब्दानांप्र।
वृत्तिरितिपक्षेकस्मिंश्चित्पुरुषविशेषसंज्ञात्वेनविनियुक्तइतिसंज्ञाशब्दा॥तत्रतेनरथकारपाधिकरणन्यायेनयोगतोप।
स्थितिरुद्धरार्थोपस्थितेःप्रतिवंधकत्वात्पुरुषविशेषोपस्थितेःकस्मिंश्चिन्नागेशःपुरुषविशेषःपरिभाषेंदुशेखरंकरु
तेरत्पचयः॥त्पपीशब्दानांप्रवृत्तिरितिप—तुनसंनिपदृणशब्दाः नभनागेशशब्दःतस्यचगुणशब्देतमाविः॥व्यक्ति
विशेषेतुतत्रगुणारांभेणप्रवृत्ति॥तत्र—द्वाराधिकरणमावानवतापत् वागानांईशःनागेशइतिव्युत्पत्त्याशेषस्या
पिगुणार्थस्यग्रहणेनागेशःशेषोमद्रुद्धानाहसपरिभावेंडशेखरंकुरुतेरत्पचयः॥अनेनतस्यमुद्रात्यकोपाधिक

शरंत्यपादं।जति

प॰ वि॰ म॰ शे॰ त्वेनसर्वबु—न स्मरणशीलत्वात् स एव अथवा सर्वान्तर्यामित्वेनसर्वबुद्धिप्रवर्तकत्वात्तस्मिन्प्र

२ योजकर्तृत्वंप्रयोजकत्वेआरोप्यतत्रापिकुरुतइतिव्यवहारइतिभावः नचैवंतस्यसर्वेश्वरत्वमत्यास्यप्रतिस्पर्शनमस्कार्यत्वा।
संभवइतिचेन्नैषम।।एकस्यैवब्रह्मणोपाधिभेदेननियम—नियमकभाववत् नमस्कार्यनमस्कर्तृत्वभावस्यैवाधकाभा
वसत्वात्।।नागेशःशब्दःसंज्ञाशब्दइतिपक्षेकुरुतइतिप्रथमपुरुषप्रयोगेणस्वप्राधान्यभावदर्शनात्तंकर्तृकार्येस्वस्या
भिमानाभावःसूचितः। किंकृत्वेत्याकांक्षायामाह।नत्वासांबमिति। अत्रसांबमितिविशेषोपादानमितरद्वयंविशे
षणम्।।नत्वंबपार्श्वहवर्तमानोमहादेवःसंतस्यचिताभस्मालेपादिवत्वेनामंगलस्वरूपत्वात्तन्नमस्कारेणमंगलसिद्धिः
फलमिति।कस्यचित्तत्प्रतिपादकवेदविदूषकत्वात्खंडशिरोमणेःशंकावारणायशिवमितिविशेषणोपादानं। ए
तेनतस्यमंगलस्वरूपत्वेनतन्नमस्कारेमंगलप्रदत्वंसूचितंभवति।।तथाचोक्तं।स्मशानेष्वा—क्रीडास्मरहरपिशाचाःस
हचराश्चिताभस्मालेपःस्रगपिनृकरोटीपरिकरः।।अमंगल्यंशीलंभवतुतवनामैवमखिलंतथापिस्मर्तृणांवरदप
रमंमंगलमसि।।१।।नचैवमपितस्यव्यक्तिविशेष—रूपानविशेषस्यत्वेनव्याप्तानंतेरमंगलप्रदत्वमनुपपन्नमि
त्याशंकायांब्रह्मेतिविशेषणोपादानं।तेनततस्यपरिपूर्णत्वेनसर्वत्रव्यापकत्वात्तदनुपपन्नमितिसूचितं।
अथवाब्रह्मेतिविशेषोपादानं।ननुब्रह्मशब्दस्यमायावाचकत्वेनतस्याश्चानर्थकहेतुत्वेनतन्नमस्कारेमंगलसि
द्धिःफलमित्यतःशिवमितिविशेषणं।।तेनमायाव्यावृत्त्याऽद्वितीयब्रह्मणोग्रहणेनतत्सिद्धिरितिसूचितम्। शि

वशाद्वस्याद्वितीयब्रह्मपरत्वंचप्रसिद्धंशिवंशांतमद्वैतंचतुर्थंमन्यंतेइतिमांडूक्यश्रुतौ॥ नन्वेवमपितस्याद्वितीयत्वेननि
र्विशेषत्वान्नमस्कार्यत्वासंभवइत्यतःसांबमितिस्वचिकीर्विशेषणंतेनतस्यमायाशवलत्वेनसविशेषत्वान्नमस्कार्य।
त्वसंभवइतिसूचितंनमस्कारपदार्थश्चमनसत्वउत्कृष्ट।त्वतोहमपकृष्टइत्याकांक्षायांबुद्ध्यानुकूलोव्यापारः।ग्रंथकर

ॐ नत्वासांबंशिवंब्रह्मनागेशःकुरुतेसुधीः

ण—प्रयोजनंनिर्दिशपति।बालानामिति॥बालत्वंचात्रनिकृष्टपरिभाषार्थानभिज्ञत्वं॥बालसंबंधनायासपूर्वकबो।
धोपकारकप्रकृतविशेषणविशिष्टसांबनमस्कारपूर्वकनागेशाभिन्नकर्तृकभविष्यत्कालिकपरिभाषेंदुशेखरना
मकग्रंथनिष्ठोत्पत्त्यनुकूलोव्यापारइतिसमुदितोवाक्यार्थः पद्यपिपरिभाषेंदुशेखरमितिपरिभाषाज्योत्स्नातपायु।

क्तः इंदुःशेखरेपस्पतमितिव्युत्पत्त्यासांववविशेषणं संभवतितथाप्यन्नकर्मकांत्तापानिवंधनमितिकर्मवाचकपदा
ध्याहारोदोषः स्वसन्निहितकर्मवाचकपदंग्रंथपदेपरिभाषापदंइंदुःशेखर परित्यक्तानराध्याहारस्तान्या
य्यत्वात् चिकीर्षितग्रंथनाथांतरनिर्दिशाकरणात्वापतेश्च ग्रंथपदेपरिभाषापदंइंदुःशेखरश्चशेखरेमूल

बालानांसुखबोधायैपरिभाषेंदुशेखरम् १

स्थानेपस्यसस्कसत्त्वस्तितिव्युतपत्तिर्बोध्या।पूर्वोक्तपलेपरिभाषेतिइंदोर्विशेषणंराहुग्रस्तत्ववारणायः। अभ
वर्तमानसामीप्येवर्तमानवद्वेतिभविष्यतिलट् अभनागेशः इतिस्वनामग्रहणोलिप्यादौविन्यासेस्पष्टमुक्तं।
दोषाभावः सूचितइतिबोध्यम् १

षितग्रंथस्समाप्तिप्रतिबंधनीभूतदुरितप्रशमायनिखिल।जयपङ्कुरुश्रीपदपेश्वरसांबतन्यात्मकदृष्टाक्रांतसमंगलस्पर्शि
स्पर्शि— ऐवंहिर्निविघ्नकुर्वन्साभाप्यतःस्वचिकीर्षितंप्रतिज्ञामविशेषत— मति जानीतेयाचानेत्यादिना।प्राचीन
वैय्याकरणाइंद्रादमस्तिस्तपांतंत्रेशास्त्रेवचनरूपेणसूत्ररूपेणपठितानिनानिभ्रनिनस्तिमिष्मादीनियानिपरि।
माषारूपाणिनानिव्याख्यापंतेश्मचय।किंचपाणिनीयतंत्रेसाधकमायसिद्धानिताचयः।अत्रज्ञापकसिद्धानीत्यु

प्रविनवैयाकरणतंत्रेवाचनिकानिअत्रपाणिनीयतंसिद्धांतिः

क्ता सूत्रपाठस्यपरिभाषाणामनाव्याख्यानमितिसूचितम्॥ज्ञापकसिद्धास्वन्यसिद्धंवहिरंगमंतरंगइत्येवमाद
यः॥न्यायसिद्धास्तुपकदेशविकृतमनन्यवदित्यादयोवोध्याअत्रन्यायस्यलौकिकत्वेनतदपेक्षयाज्ञापकस्यशास्त्री
यत्वेनअभ्यर्हितत्वमितिपादकपदस्यैवपूर्वनिपातः एतेनज्ञापकन्यायसिद्धानीत्यत्रतत्पुरुषगर्भितसाधकन्या
यसिद्धेतिद्वंद्वेअल्पस्वावतरत्वेनन्यायशब्दस्यैवपूर्वनिपातेनभवितव्यमिति आशंकापरास्ता श्रीमत्प्रणवपूर्वकाहू
यतीर्थचरणद्वंद्वेभ्यान्नमः ॥ ॥

नत्वप्राचीनोभ्येतितत्सापकसिद्धानांसंज्ञापूर्वकोविधिरनित्यइत्येवमादीनामपिपाणिनीयतंत्रीयत्वेनप्रामाण्य
स्यनिश्चायितयत्नत्वात्कीरिष्यमाणान्तत्खंडनमयुक्तंस्यादित्यतआह भाष्यवार्तिकयोर्निवद्धानि॥ओर्गुणेत्यादिपाणि
नीयसूत्रयपगुणादिग्रहणात्तापिमत्वेतंत्रीयत्वेपिभाष्यवार्तिकनिवद्धत्वाभावेननासामप्रामाण्यमव्याहतमेवेति
भावः शाष्टीकरीष्यतेचैतदुपरिष्टात् अनेनभाष्यवार्तिकनिवद्धत्वमितिपरिभाषापदस्यरूढार्थतावद्योदकमि

भाष्यवार्तिकयोर्निवद्धानियानिपरिभाषारूपाणितानिव्याख्यायन्ते
नन्वलण आइउण सूत्रयोर्णकारस्यैवोपादानेनाणिणग्रहणेषु
संदेहादनिर्णयेनआह व्याख्यानतोविशेषप्रतिपत्तिर्नहिसंदेहादल॥
णं विशेषस्यान्यतरपर्यर्थरूपस्यव्याख्याना — ष्टकृतान्यतिपचिर्निश्चयः

तिवेदितव्यम् अतःस्पुष्टरूढमिदंपरिभाषापदं॥परितोव्याप्रतांपरिभाषांप्रवदंतइत्यभियुक्तोयोगरूढंपरिभाषापद
मित्यपिकेचिद्वदंति।एतावतास्फुटयौगिकत्वमितिसर्वव्यापिनास्ती — प्रतीयते।लिंगवत्वेसतिसंदिग्धार्थनियामक
त्वंपरिभाषात्वमितिलक्षणंत्वष्टाध्यायीपाठस्यषष्ठीस्थानेत्यादिपरिभाष्यासूत्राभिप्रायकम् ॥ ॥

अमथा वर्णाश्रयेनास्तिप्रत्ययलक्षणमेकदेशविकृतमनन्यवदिति निषेधातिदेशेषु तत्त्वाभावेनाव्याप्तिरायये
न ॥ व्याख्यायंतत्तस्यव्याख्यामविषयीभूताः क्रियंतइत्यर्थः ॥ तत्त्वंचमदच्छेदाद्यन्यतमत्वम् ॥ तदुक्तंच यदच्छेदः पद
र्थोक्तिर्विग्रहोपाक्यपोजना। आक्षेपोऽथसमाधानं व्याख्यानं ष— धंस्मृतमिति ॥ अथवाव्याख्यानंपदच्छेदो क्तिद्वा।
पविशेषेण—क्षेपपूर्वकसमाधानकथनं ॥ ष—धमित्युक्तः स्तुवि—ष्टेकलक्षणाभिप्रायेणापयोज्याकुत्रचित्क।
स्यचिदनुवृत्तिस्तु सोलभ्याभिप्रायेणाऊहिनीयत्वमुक्तमिति सर्वमवुद्धिमत ॥ नतु प्रावीनोक्तदितज्ञापकसिद्धा
तिरिक्तानामेवयतासांयुत पदच्छेदायुक्तिद्वीराभ्याक्षेपकथनमेवेतिविरुद्धामाख्यानमितिविवेक्तव्यम् ॥ अतो
त्रविशब्दस्तंत्रेणविशिष्टविरुद्धेनउभययाः ॥ वर्णान्तरोपादानेसंभवति ॥ अत्र उण् लण् इति सूत्रद्वयेणवण
कारस्योपादानेदलोपेपूर्वस्यदीर्घोणः केणः अणोः प्रगृह्यस्यानुनासिकः उरण्रपरः अरगुदित्सवर्णस्यचाप्र।
त्ययः इतिसूत्रेष्वण ग्रहणे अणः पीम्वमित्यादिष्टिणग्रहणे संदेहस्यातथासतिसंदिग्धार्थबोधकत्वलक्ष।
णामप्रामाण्यंशास्त्राणामापयेतेत्याशयेनप्रथमपरिभाषामवतारयति ॥ नचिस्यादिना शिष्ट
क्तनादिति ॥ शिष्टास्त्वात्रभाष्यकारादयः तत्त्वंत्वसक
॥ ॥ ॥ लक्षणास्वार्थविषयकभ्रांतिराहित्यम् ॥ ॥ ॥ ॥

प. शे.

ध

५

ननुसंदेहाद्व्याख्यानस्य लक्षणत्वनियमासंभवादलक्षणमिदमनुपपन्नमत आह ॥ अननुष्ठापकमिति तथा च लक्ष
णशब्दो ह्यनुष्ठापकपरः तदर्थान्वेषणेव न तत् पुरुषः तथा च अलक्षणमित्यस्य अननुष्ठापकमित्यर्थः एवं च
स्यति न चासति संदेहाद्व्याख्यानस्य लक्षणत्वनिषेधासंभवेऽप्यननुष्ठापकत्वनिषेधेन किं विदाधकमिति भावः ननु लो
पे पूर्वस्येति सूत्रेणाण ग्रहणे संदेहः अत्रत्य अण ग्रहणसामर्थ्यादेव पूर्वेणैवाण्ग्रहणमिति ज्ञापनादन्यथा ढ्लो
पे पूर्वस्य दीर्घो व इत्येव वक्तव्ये अजित्यभावेऽपि करिष्यति परिस्थित्या वा अण ग्रहणमनर्थकं स्यात् तथैव केण इत्यत्रापि के च।

अननुष्ठापकं लक्षणं न तथा शास्त्रस्य निर्णायकत्वं व्याख्यानादित्यर्थः असंदिग्धानु
ष्ठानसिद्ध्यर्थं हि शास्त्रं ॥

इत्येव वक्तव्ये णग्रहणसामर्थ्यादणपूर्वेणैवेति न संदेहः एवमणोऽप्रगृह्यस्यानुनासिक इत्यत्रापि अजिति भवक्तव्ये
अण् ग्रहणसामर्थ्यादण् पूर्वेणेति उस्थाने परसवर्णो संभवात् ननु संभव इत्युक्तं कर्मर्थहन्त्रैय मित्यत्र संभवात् सं
भवेऽपि फलाभाव इति वाच्यम् रपरत्वे रेफद्वयश्रवणस्यैव फलत्वात् न चैवं हलोपमामित्येकस्यैतापो भविष्यती
ति वाच्यम् तत्र रूपोह इत्यस्य अनरस्यामित्यनुवृत्तेः पक्षे रेफद्वय श्रवणस्य ॥ ॥ ॥ ॥ ॥

४

तदवस्थत्वादितिचेन्न।रोदीत्यनेनज्ञप्यलोपेसतिपूर्वो फलासम्भवेनासंभवस्ययुक्तत्वात् नवैव प्यसंभवइत्य
युक्तंमातृणांतृणंपितृणामित्यादौसंभवात् नत्रफलाभावस्तयुक्तः इष्टत्वेफलस्यस्पष्टत्वादितिवाच्यम् तत्रसं
भवेपिज्ञापकेनफलाभावेसतितस्यचराहनत्वात्।ज्ञापकत्वंश्रुतइद्धानोरितिसूत्रेमातृणांपितृणामित्यादि।
व्यावृत्त्यर्थंधातुग्रहणंज्ञापयति॥नवान्तरपरत्वं अन्यथारपरत्वेऽनन्तपत्वाप्रसक्तौनहमाहृत्यर्थंधातुग्रहणंप
तर्थकंभवेदिति॥अणुदित्सवर्णस्यचाप्रत्ययपरत्वत्रापिअणापरेणैवनपूर्वेणेतिचेतिनसंदेहः त्वमन्यथादीर्घेत्या।
व्यमर्थंकिपमाणाउक्तौदितितपरकरणंनिरर्थकंभवेत् कुत्रपरेणैवाणग्रहणमितिज्ञापितेपिऋकारस्यविधी
पमानत्वेनभिन्नकालस्यग्रहणप्रसक्तौनपरकरणंव्यर्थमितिवाच्यं।सिद्धऋकारानुवादस्यइत्तरादिपरिसंख्यार्थ
त्वेननतस्यविधेयत्वासंभवात्॥अविस्त्रुधात्वितिसूत्रेअर्द्धमात्रालाघवादिण इतिवक्तव्येचोर्ग्रहणसामर्थ्यादिण ग्र
हणंसर्वत्रपरेणैवनपूर्वेणेतोण ग्रहणेष्वनसंदेहे इतिलण सूत्रस्यभाष्योक्तज्ञापकेवसंदेहग्रवा
रणेन ~ हृत्यर्थत्वेनइयंपरिभाषानिरर्थकाभवेदित्यतआत
असंदिग्धानुष्ठानेति ॥ ॥ ॥

प॰ रि॰

५

5

संदिग्धोच्चारणरूपाचार्यव्यवहारेणेत्यत्र संदिग्धपदे अर्शआद्यच् तथा चायमेतस्यार्थः संदिग्धार्थप्रतिपादकण।
दापनत्वं योच्चारणरूपाचार्यव्यवहारेति तत्तत्स्थले संदेहनिवारणार्थं तेन तत — पकाकाऽप्रषणेऽप्रतिप्रतिगौरवात् सर्व
त्रज्ञापकमेवेति नियमाभावाच्च ममावश्यकीतिभावः अत एव भाष्ये ज्ञापकानि प्रदर्श्य बहूनां दरेणैव किं पुनर्वर्णा —
त्मना विवापं पकांय हिरनुवक्ष्यते तन्त्राम पप्याचार्यो भवत्येषा परिभाषाख्यानतो विशेषप्रतिपत्तिर्न हि संदेहारसणमि

संदिग्धोच्चारणरूपाचार्यव्यवहारेण संदेहनिवृत्ते व्याख्यानातिरिक्तनिमित्तानपेक्षत्वं बोध्यत इति यावत् तेनाणुदित्सवर्णस्येत्यत्र परिहाय पूर्वेणाणा ग्रहणं परेणै
वेणा ग्रहणमिति लणः सूत्रे भाष्ये स्पष्टम्

स्थुक्तम् एतेन संदेहनिवृत्तौ व्याख्यानमेव शरणम् ज्ञापकानुसरणे तु पृथैवेति फलितम् एतदेव अनंतरमण्।
दित्सवर्णपरितापपूर्वेणैवाणा ग्रहणं परेणैवेणा ग्रहण मिति व्याख्यास्याम इति स्पष्टीकृतं भवता भाष्यकृता इत्या
ह तेनेति तच्छ्रेष्ठो व्याख्यानपपमर्शकः तथा च एतद्भाष्यविषयादेव ज्ञापकापेक्ष संदेहनिवृत्तिर्न व्याख्यानमात्रा
दिति सोरदेवा युक्तिन्पिरस्ता वेदितव्येति सूचयतीति दिक् श्रीमन्नार्कब्रह्मानन्दसरस्वतिगुरुचरणकमलेभ्यो नमः

५

ननुव्याख्यानतरतिपरिभाषांसमाप्यएतत्संज्ञेतीयपरिभाषांनरावसरेकार्यकालमितिपरिभाषाद्वयमत्रासंगतम्
अतएवात्रैनद्वयंसीरदेवादिभिर्नोक्तमित्याशंक्यसंज्ञापरिभाषाशास्त्राणांसर्वस्यास्त्रोपयोगित्वेनादोषयथोद्देशेखलुतथाकार्य
कालमितिपरिभाषाद्वयस्यापिसर्वपरिभाषोपयोगित्वात्॥अत्रलेखडचितएवेतिसंगतिप्रदर्शनपूर्वकंपरिहरन्परि
भाषामवतारयति। तत्रेति। तयोराद्यपरिभाषार्थंवक्तुंतद्घटकीभूतयथोद्देशपदार्थंयथोद्देशपदान्तर्गतोद्देशपदार्थंवा
ह उद्देशमनतिक्रम्येति॥उद्देशेति।एवंचान्यत्रप्रयत्नमाख्यामनुपदेशःगुणैःज्ञापनमुद्देशइति।उद्देशोपदेशयोर्भेदेपित

तत्रसंज्ञापरिभाषाविषयेएतद्द्वयमाह।यथोद्देशंसंज्ञापरिभाषं कार्य
कालंसंज्ञापरिभाषम् उद्देशमनतिक्रम्ययथोद्देशम् उद्देशमुपदेशः
अधिकरणसाधनश्चायम् यत्रदेशेउपदिश्यतेतद्देशएव

त्वद्देशउपदेवएवेतिसूचितम् अत्रायंचाकार्थ संज्ञापरिभाषंयथोद्देशंस्वोच्चारणकालमनतिक्रम्यवाक्यार्थबोधंज
नयतीति तथाचउद्देशपदंअनुत्पादयन्स्वोच्चारणदेशएववाक्यार्थबोधेनवृद्धिरादैजिसंज्ञाविषयेवृद्धिआदिपदानांआदैजा
दिषुगृहीतशक्तिज्ञानेनवृद्धिविधिशास्त्रेषुवृद्धिआदिदृष्टेउद्बोधकवशात्तदर्थस्मृतौतत्रतद्विधिवाक्यार्थबोधोभवति।परिभाषा।
विषयेचगृहीतपरिभाषार्थेनैवतत्तद्विधिस्थलेतदर्थस्मृतौलक्ष्यसंस्कारकवाक्यार्थबोधोभवतीत्यस्मिन्पक्षेपिसर्वे
ष्टसिद्धिर्भवतीत्याह यत्रेति

प॰रि॰ ९ 6

ननु पत्रे देश इत्युक्ता उपदिश्यते उच्चार्यते यस्मिन्देशे स उपदेश इति व्युत्पत्तौ फलितायामुच्चारणदेश एव उपदेश इत्या
यातिः तन्न युक्तम् उच्चार्यते इत्यस्य उच्चारणक्रियया निष्पाद्यत इत्यर्थो बोध्यः तथा चोच्चारणक्रियानिष्पन्नस्य शब्दस्या
काशदेशत्वेन दोषस्य चत्वात् इत्यत्वेनात्मनिष्ठत्वाद्धृतिरूपेणांतःकरणनिष्ठत्वाद्दोभयोः सामानाधिकरण्यासंभवा

वाक्यार्थबोधेनगृहीतशक्त्यागृहीतपरिभाषार्थेन च सर्वं शास्त्रे व्यवहारः ।
देशश्चोच्चारणकालएवात्र शास्त्रे व्यवह्रियते

त्तद्देश एव वाक्यार्थबोधेनेत्यस्यासंगत्यापत्तेरित्यत आह देशश्चेति लक्षणयेति शेषः चशब्दो ऽत्यर्थे बोध्यः त
थाच भिन्नदेशनिष्ठानामपि पदार्थानां कालाव्यवच्छेद्यत्वात् कालिकसामानाधिकरण्येन किंचित्प्रतिबंधकामिति
॥ ॥ भावः ॥ ॥

९

ननु पत्रकाले उच्चारणं संज्ञापरिभाषाशास्त्रस्य तदानीं विधिवाक्यार्थज्ञानेन किमस्य फलमित्याकांक्षायां तस्याः पूर्वभा
वेन निराकांक्षत्वं वाक्यार्थबोधानिष्पत्तेर्नोपपद्यते अथान्वित्याकांक्षा मनसि निधाय ईदूदेद्द्विवचनं प्रगृह्यमिति सूत्रे दीर्घाणा
मेव तपराणां प्रगृह्यसंज्ञेति प्रकृते तत्र दीर्घाणां चोच्यमाना प्लुतानां न प्राप्नोतीत्याशंक्यासिद्धत्वेन समाधायानंत
रं च एवमपि यत्सिद्धे प्रगृह्यस्य कार्यं तत्र प्लुतस्य न प्राप्नोत्यप्लुतो प्रगृह्यस्यानुनासिक इतीति पुनराशंक्य एवं तर्हि किं
नु एतेन कार्यकालं संज्ञापरिभाषमिति यथोद्देशसंज्ञापरिभाषं अत्र चासावसिद्धस्तस्यासिद्धत्वात्तत्कालो भ
वतीति परिहृतं भाष्यकृता तत्र चैके पठेन कार्यकालपक्षमाश्रित्याहेत्येवमपीति शंकाभाष्यमवतार्य यथोप
योद्देशपक्षाश्रयेणापरिहारभाष्यस्य तात्पर्यं वर्णितम् अनंतरं च कार्यं पुनरयं पक्षो यावता कार्यार्थत्वात्संज्ञाप

तत्तद्वाक्यार्थबोधे

रिभाष्यस्य कार्यकालत्वमेव न्याय्यमित्याशंक्य नैष दोषः एतदनुद्दिश्य प्रयोजनविशेषं प्रयोजनमभिसंधाय भवि
ष्यति किंचिदनेन प्रयोजनमिति संज्ञापरिभाषं प्रणीयते न तदा भवत्येवापपत्तो यथाश्रुतग्राहिमिति पत्रपेत्त र
ति समाहितम् तथा चैतत्केपठं ग्रंथपर्यालोचना पामहावाक्यार्थपर्यालोचनप्रवृत्तमतिपत्तारं प्रत्येतत्पक्षस्य दु
ष्टत्वेपि यथाश्रुतग्राहिपत्तारं प्रति त्वयं पक्ष अयानेवन पूर्वोक्तदोषप्रशक्तिरित्यत आह तत्तद्वाक्यार्थबोधेति ॥
तथा चैतत्पक्षे यथोद्देशपक्षे संज्ञापरिभाषयोः स्वदेशे लब्धसंस्कारकवाक्यार्थबोधस्तदुत्तरं विधिप्रदेशे तत्तदु
पस्थित्या वाक्यैकवाक्यतायां तत्र वलब्धसंस्कारकवाक्यार्थबोधः कार्यकालपक्षे तु विनैव स्वदेशं वाक्यार्थं तत्र तत्रा
त्र विधिप्रदेशे तत्तदुपस्थितौ पदैकवाक्यतया अन्वये लब्धसंस्कारकवाक्यार्थबोध इति फलितम् ॥ ॥

एतच्च यथोद्देशपक्षतावच्छेदेन परिभाषाशेषषष्ठीस्थानेयोगेति सूत्रस्य भाष्यविरुद्धं तत्र हि अस्य अत्रवपवषष्ठ्यादि।
षु संदेहः अथवा किंचिल्लिंगमासज्य वक्ष्यामीत्यर्थे लिंगात् षष्ठीस्थानेयोगा भवन्तीति न च तल्लिंगमवपवषष्ठ्यादिषु करि
ष्यते इति पक्षान्तरमाश्रितेन तत्र पद्येवं शास इदङ्हलोः शासिहो शासि इत्यहणं कर्तव्यं स्थानेयोगार्थे लिंगमासंक्ष्या
मीत्याशंक्य न कर्तव्यं पदेवादः परस्मादवपवषष्ठ्यर्थे प्रक्रान्तं एतत् दुनरवानद्वतं सत्स्थानेयोगार्थं भविष्यतीति च समाधा
यतद्दुतरं कथमिति चेत् अधिकारो नाम त्रिप्रकारकः कश्चिदेकदेशस्थः सर्वशास्त्रमभिज्वलयति यथा प्रदीपः।
सुप्रज्वलितः सर्ववेश्माभिज्वलयति अपरो यथा रज्ज्वा अयसा वा बद्धं काष्ठमनुकृष्यते चकारेण अपरोऽधिकारः
प्रतियोगं तस्यानिर्देशार्थ इति योगे योग उपतिष्ठत इत्युक्तम् तत्र प्रदीपस्य प्रभाद्वारा सर्वप्रकाशकत्ववदेतस्यापि।

ज्ञाने भविष्यति किंचिदनेन प्रयोजनमिति ज्ञानमात्रेणासंतुष्यप्पाश्नत्राहि इति।
पत्रपेत्तोपपन्न इति इदं देन्तत्रैकैयटः किंचित ॥ ॥ ॥

स्वबुद्धिजननद्वारा सर्वशास्त्रोपकारकत्वमित्याशयकः कश्चिदेकदेशस्थ इत्याद्यभिज्वलयतीत्यंतं भाष्यस्य पदद्वयस्वा
धारणेपनतस्मात्तदपेक्षिपदैकवाक्यतायाः अनीत्वा विरोधस्यास्पष्टत्वात् न चैतद्भाष्यादधिकारप्रक्रमात् अधिका
रविषयेतयासत्वेप्येतस्मात्परिभाषाविषये तथा कस्मिन्नप्युक्तत्वाद्विशेषापादानमयुक्तमिति वाच्यम् पारार्थ्य
सामान्येनैतस्यापि परिभाषात्वाभ्युपगमात् अत एव तत्रैवाधिकारो नामेति प्रतीकमुपादाय पारार्थ्यसामान्यात्परिभाषा
प्यधिकार उच्यते इति तथा सति भाष्यविरोधस्यास्पष्टत्वात् न तथा परिभाषाग्रहणं युक्तमिति अरुच्या परिभाषाविष
येस्याभिप्रेतार्थमाह किंचित्त्वित्यादिना इमामेवारुचिं मनसि निधाय एवं त्रैकैयट इत्युक्तम् ॥ ॥

ननु यत्नद्वयेपि पदैकवाक्यतायां कार्य्यकालपक्षाद्यथोद्देशपक्षस्य न कश्चिद्विशेषः सिध्येत तथा सति निर्देशादिति
सूत्रस्य कार्य्यकालं संज्ञापरिभाषमिति संज्ञापरिभाषाविषये पक्षद्वयव्यवस्थापनं च परभाष्यं विरुध्यते त्यत आह नन्वत्रे

परिभाषाविषये तस्मिन्निन्यादिवाकार्थबोधे समभीतिर्देशादिकेनिपर्यालोचनायां सकलननविधुपस्थितौ सकलननसंस्कारायगुणभेदं परिकल्प्यैकवाक्यमेव नियमः कार्यकालपक्षे तत्रिपाद्यामनुपस्थितिरिति विशेषः एतदेवाभिप्रेत्याधिकरोनामत्रिप्रकारकः कश्चिदेकदेशस्थः सर्वं शास्त्रमभिज्वलयति यथा प्रदीपः सुप्रज्वलितः सर्वं वेश्माभिज्वलयतीति षष्ठी स्थाने इति सूत्रे भाष्ये उक्तम्
अधिकारगणाद्वैनपारार्थ्यात्परिभाषाणुच्यते कश्चित्परिभाषारूप इति एकपदः दोपायथा प्रभाद्वारा सर्वं गृहप्रकाशक एवमेतत्स्वबुद्धिजनन द्वारा सर्वशास्त्रोपकारकमिति
तात्पर्यं एतच्च एकलद्वयसाधारणं भाष्यम् पक्षद्वयेपि प्रदेशैकवाक्यतापाइतः प्रतीतेः तत्रतावान्विशेषः य
थोद्देशे सर्वत्रविधिसूत्रबुद्धावात्मभेदं परिकल्प्यते रेकवाक्यता परिभाषाणां नदुक्तं किं तु नित्विति सूत्रे कैपटे य

तावानाविशेषेणैव पक्षद्वयस्थापनेपि न भाष्यविरोध इति भावः किंतु चेति सूत्रे वार्तिककृता तोपधार्थ निमित्तग्रहणस्य कर्तव्यतां चोदिता तन्नत्याख्यानाय अथवाकार्यकालमिति पक्षान्तरमाश्रित्य अथवापदेतन्प्रयोगे किंग्रहणं तदनवकाशं

प॰ रि॰ शे॰
टी॰
८
8

तस्यानवकाशत्वाद्गुणत्वहानिर्नभविष्यतइतिपुनः पक्षांतरमाश्रितंभाष्यकृता तत्रचअथवेतिप्रतीकमुपादायमाभू।
त्परिभाषातथापिप्रतिषेधाकांक्षायांयावंतोयादृशाः प्रतिषेद्धव्यास्तावंतिप्रतिषेधसूत्राणीतिप्रगतलक्षणयगुणेप्र
तिषेधे। अनवकाशप्रतिषेधोव्यवहितेपिप्रवर्ततइत्युक्ताअथवायथोद्देशपक्षाश्रयेणभाष्यं तथाहिप्रधानान्यात्मसं।
स्कारायसंनिधीयमानानिगुणभेदंप्रयुंजते यदेतस्मिन्निरुक्तमितिकैयटस्यपक्षांतरोक्तिः तदुक्त्वातत्प्रतीतिविरोध।
ध्वनयंतांस्तानुकूलयितुमाह तदुक्तमिति गुणभेदमिति परिभाषाभेदमित्यर्थः प्रतिप्रधानंगुणावृत्तिरितिन्या
यात् स्पष्टश्चायमर्थः तृतीयाध्यायस्यप्रथमेपादेदशापवित्रेणग्रहंसंमार्ष्टीतिसप्तमाधिकरणे तत्रहि सोम
प्रकरणेदशापवित्रेणेतिवाक्यंश्रुतम् दशापवित्रंवासःखंडः अत्रयः कश्चिद्ग्रहः शोधनीयः सर्वेवाग्रहास्तद।
र्थंसंशयश्चग्रहमित्येकत्वंविवक्षितमविवक्षितंवेति पशुनायजेतेत्यत्रउपादेयपशुगतैकत्ववदुद्देश्यग्रह
गतैकत्वस्यापिविवक्षितत्वेनएकएवग्रहः शोधनीयमितिप्राप्ते ग्रहमितिद्वितीययाग्रहस्योद्देश्यत्वेनप्रयोजनव
त्त्वेनाप्राधान्यप्रतीतेः संमार्गस्यचगुणत्वेप्रतिप्रधानंचगुणआवर्तनीयइतिन्यायेनयावंतोग्रहाः स
तितेसर्वेशोधनीयाः श्रूयमाणमपिग्रहमित्येकत्वमुद्देश्यगतत्वादविवक्षितमेव अन्यथाग्रहंसंमृज्या
त्तच्चैकमितिविधेयार्थभेदेनवाक्यभेदप्रसंगात् पशुनायजेतेत्यत्रतुप्रधानंयागंप्रतिपशोर्गुणभूतत्वा
त्पूर्वोक्तन्यायावसरइतिविधेयगतत्वाद्विवक्षितमेवतत्रवाक्यभेदस्तुविशिष्टविधानेनैवपरिहरणीयइ।
निराकाङ्क्षांतइतिस्थितम् ॥ ॥

८

यथोद्देशपक्षगतविशेषमुक्त्वा कार्यकालपक्षगतविशेषमाह। कार्यकालेति अत्रायं निष्कर्षः यथोद्देशे परिभाषाप्रद
शे एकवाक्यतया वाक्यार्थबोधे लक्ष्यसंस्कारकः स च विशेषग्राहिप्रतिपत्त्रपेक्षः कार्यकाले तु परिभाषाप्रदेशे विप्रतिषेध
यशास्त्रोपयोगिनित्याकांक्षत्वावाक्यार्थबोधे जाते अनंतरमाकांक्षावशाद्विधिप्रदेशे परिभाषोपस्थितौ एकवाक्यतया लक्ष्य
संस्कारकोनिराकांक्षत्वमेव वाक्यार्थबोधइति कैयटमतेत्वयं निष्कर्षः यथोद्देशे सत्ता परिभाषयोः स्वदेशे वाक्यार्थबोधो
त्तरं विधिप्रदेशे वा वैकवाक्यतया लक्ष्यसंस्कारकमहावाक्यार्थबोधः यथाश्रुतग्राहि प्रतिपत्त्रपेक्षस्यायम् कार्यकाल
पक्षे तु विधिप्रदेश एव एकवाक्यतया वाक्यार्थबोधः विशेषग्राहिप्रतिपत्त्रपेक्षस्यायम् ननु तत्तद्विधिप्रदेशपरिभा

कार्यकालपक्षेन्तु ननु तद्विधिप्रदेशे परिभाषावृद्धैकवाक्यतेति

अत्रैकदेशस्थत्वेनेन ॥

षाबुद्ध्यैकवाक्यतापन्नां परिभाषाशास्त्राणां तत्तद्देशस्थत्वेन तस्मिन्निति तस्मादिति परिभाषयोः ङमो ह्रस्वादचीत्यादे
कशास्त्रैकवाक्यतयोभयोरप्येकदेशस्थत्वेन परत्वाभावात्परत्वादित्याशयको भयनिर्देशे पंचमीनिर्देशो बलीयानि
ति तस्मिन्निति निर्दिष्टे पूर्वस्येति सूत्रस्थभाष्यं विरुध्येत किंच यथोद्देशपक्षे परिभाषाप्रदेशे विध्येकवाक्यतायास्त्वपि च
बहुवचने झल्येदित्युभयोरपि तस्मिन्निति एकपरिभाषैकवाक्यतयोभयोरपि परिभाषात्रैपेकदेशस्थत्वेन परत्वव्या।
घातात् रामेभ्य इत्यादौ चरितार्थस्य बहुवचने झल्येदित्यस्य तेन परत्वात्तस्यापि चेत्यस्य बाधाकरणेन रामेभ्य इत्यादीनाम
सिद्धिप्रसंगः स्यादित्यत आह॥ अत्रैकदेशस्थ इति ॥ ॥

प॰ रि॰ शे॰
टी॰
९

ननु क्ङितिचेति सूत्रेऽप्यवाकार्य्यकालं संज्ञापरिभाषमिति पक्षांतरे भाष्यकृता क्ङितिचेति निषेध सूत्रस्य कार्य्यकालपक्षाश्रयणं नदग्रिमग्रथवायदेत स्मिन्निति पक्षांतरपरं भाष्यमाभूत्परिभाषेत्यादिना व्याख्याय ग्रथवा यथोद्देशपक्षाश्रयेण भाष्यमिति प्रकारांतरेण व्याख्यात्रा कैयटेन क्ङितिचेत्यस्य यथोद्देशपक्षाश्रयणबोधनं चेत्तुभयमप्ययुक्तं स्यात् तस्य निषेधसूत्रत्वेन परिभाषात्वस्यायुक्तत्वात् संज्ञापरिभाषयोरेव यथोद्देशकार्यकालपक्षाश्रयणस्य ईदूदेद्द्विवचनमिति सूत्रभाष्ये स्पष्टत्वात् तथा सति क्ङितिचेति सूत्रस्य भाष्यकैयटस्य स्वाभिप्रेतार्थं तदुक्तमित्यादिना स्वानुकूलीकरणात्वा

तत्र तत्र तत्तद्दुद्भावपि तत्तद्देशस्यत्वं वारयति यथा व्यवहर्तृणां कार्य्यार्थमनेकदेशगमनेऽपि न तद्देशीयत्वव्यवहारः किंत्वभिजनदेशीयत्वव्यवहार एव तद्वन्निषेधवाक्यानामपि निषेध्यविशेषाकांक्षात्वाद्धि यैकवाक्यतयैवान्वय इति परिभाषासादृश्यात्परिभाषात्वेन व्यवहारः क्ङितिचेति सूत्रे भाष्ये तत्रैकवाक्यता ॥

श

मयुक्तमित्यत आह निषेधवाक्यानामपीति तथा च क्ङितिचेत्यस्य निषेधत्वेन परिभाषात्वाभावेऽपि तस्य परिभाषासादृश्येन परिभाषात्वमादाय त्रिभाष्यकैयपरिभाषे दुर्वेरस्यात्रय: तेयमपि नायुक्तमपीति भावः नन्वेकवाक्यत्वं च परस्पर भिन्नानां वाक्यानां ग्रन्यतराकांक्षापोभयाकांक्षया वैकतात्पर्य्यकत्वम् तच्च विधिनिषेधयोः परस्परविरुद्धार्थकत्वेनैकतात्पर्य्यकत्वाभावान्न संभवतीत्यत आह तत्रैकवाक्यतेति ॥ ॥

९

८

पर्युदासेति पर्युदासोप्येकवाक्यतासाधकस्तथा दशमाध्यायस्य अष्टमे पादे प्रथमाधिकरणे मीमांसके विचारितः
तत्र हि यजतिषु येयजामहं करोति नानुयाजेष्वित्यत्र नञ् प्रसज्यप्रतिषेधार्थकः पर्युदासार्थको वा। इत्यर्थसंशयस्य तत्र
इं करोति नासंबध्यते नुयाजपदेनचेति तत्रप्रधानान्वयलाभेसंभवति अप्रधानान्वयस्यायुक्तत्वात् करोत्यर्थस्य
प्रधानत्वेगतत्रैवाचायत्वात्प्रसज्यप्रतिषेधार्थकएव नञ् चैवंसति यजतिषु येयजामहं कयेतीति अनुयाजेषु सामान्यतः
प्राप्तस्यापि येयजामहकरणंस्यनानुयाजेष्विति निषेधेनतदंशेतद्वाक्यमप्रमाणंस्यात् तुभयोरपि वैयवाक्यत्वाविशेषा
त् अपामास्यकल्पयितुमयुक्तं मिति चेत्र विकल्पाभ्युपगमेनाप्युभयप्रामाण्यस्यात्तत्वेनारोषात् इति प्राप्ते विक।

पर्युदासन्यायेन ॥

ल्पस्याष्टदोषदुष्टत्वेनान्याय्यत्वात् परस्परविरुद्धयोर्विधिनिषेधयोः समुच्चयस्यासंभवाच्चोभयाप्रामाण्यपरिहारार्थं त
त्परिहारायनञ्पदं अनुयाजपदेनैवान्वेति॥ तथासतिसपर्युदासार्थकएव तदुक्तंच पर्युदासःसविज्ञेयोयत्रोत्तरपदे
ननञ्जिति॥ तथासतिनञ् पदसमभिव्याहारेणअनुयाजपदस्य अनुयाजव्यतिरिक्तपरत्वेयजतिषुयेयजामहंकरोतीत्य
नेनैकवाक्यतयान् जभिन्नेषुयजतिषु येयजामहं कुर्यादिति वाक्यार्थो नोभयोरपि प्रामाण्यमक्षतमेवेति सिद्धान्तितम् ॥
तथाचात्रनञः पर्युदासार्थकत्वेनयजतिषुयेयजामहंकरोतिनानुयाजेष्वित्यनयोरेकवाक्यतातथाप्रकृतेपिनञः पर्युदा
सार्थकत्वेन ङ्किः ङित्त्रसार्वधातुकार्थं ईथास्त्वकयोः परतः इगन्तांगस्य गुणः इत्यादिरूपासार्वधातुकेति ङ्किः ङिच्चेत्यनयोः परस्प
॥ ॥ ॥ रविरुद्धार्थकत्वेप्येकवाक्यत्वात्सिध्यतीति भावः ॥ ॥

प॰ रि॰ टी॰
१०
10

ननुव्यस्तस्यापिनञः क्वचिदुपक्रमादिविषयेपर्युदासार्थकत्वमितिमीमांसकमर्यादा। तथापिसमस्तस्यनञः विनाप्र
माणंप्रधानान्वयलाभासंभवेन तत्रपर्युदासार्थकत्वस्यावश्यकत्वेपिअसमस्तस्यनञः प्रधानान्वयलाभेसंभवति
असतिवाधके प्रधानान्वयस्यायुक्तत्वात् प्रसज्यप्रतिषेधार्थकत्वमेवाभ्युपगणीयं तथाचात्रोत्सर्गापवादन्यायेनवाध्यवाधक
भावाश्रयणेनप्रधानान्वयलाभस्यसंगतिभत्वात् प्रसज्यप्रतिषेधार्थकत्वमेवयुक्तमाश्रयितुं अतएवपर्युदाससमासेन

प्रसज्यप्रतिषेधेपितेनसहवाक्यार्थवोधमात्रेदैकवाक्यताव्यवहारः ॥ ५

कवाक्यताश्रयणस्यायुक्तत्वाभिषेधस्यविध्येकवाक्यतयापरिभाषासादृश्येनपरिभाषात्वंकल्पयितुमशक्यत्वादस्मिन्मतआ
ह प्रसज्यप्रतिषेधेपीति तथाचप्रसज्यप्रतिषेधाश्रयणेपदैकवाक्यताभावेपिनिषेधस्यनिषेध्याकांक्षायांनिषेधशास्त्राप
स्थितौवाक्यैकवाक्यतयैकवाक्यत्वव्यवहारस्यासत्वाभपरिभाषासादृश्येनपरिभाषात्वंकल्पयितुमयुक्तमितिभावः
॥ ॥ ५ ॥ ॥

१०

यद्यपियथाकार्यकालपक्षेपरिभाविषयेसाकांक्षविप्रतिषेधशास्त्रोपयोगिशास्त्रबोधस्यपरिभाषाप्रदेशएवोत्पत्ता
वनंतरंविधिप्रदेशेपितद्यस्मिन्यानियकांक्षमादेकवाक्यतयाबोधः तथासंज्ञाशास्त्रविषयेपिकार्यकालपक्षेन्याय
साम्यान्यायः तथापितस्मिन्नितिसूत्रस्यभाष्यप्रामाण्यान्मतपक्षेपरिभाषाविषयेतथाभ्युपगमेपिसंज्ञाशास्त्रविषये
तथाभ्युपगमेप्रमाणानुपलब्धेः प्रकृतेचादसोमादितिसूत्रस्यभाष्यविरोधश्चाधिकश्चापद्येत। तत्रहिमात्प्रगृह्यस्यसं

संज्ञाशास्त्रस्यतुकार्यकालपक्षेनपृथग्वाक्यार्थबोधः किंतुप्रदेशवाक्येन
सहैव अतएवाणोःप्रगृह्यसंज्ञेतदेकवाक्यतापन्नादसोमादित्येतन्नप्रतिन
मुत्वायसिद्धं ॥

ज्ञायांनस्यासिद्धत्वादयावेकादेशप्रतिषेधइतिवार्तिकंमात्प्रगृह्यसंज्ञायांनस्यईत्वस्यऊत्वस्यचासिद्धत्वादयावेकादेशाःप्रा
प्नुवंतितेषांप्रतिषेधोवक्तव्यः॥ अमीअत्रअमीआसते॥ अमुअत्रअमूआसाते इतिसप्रयोजनंव्याख्याय ननुचप्रगृह्यसं
ज्ञावचनसामर्थ्यादयोनभविष्यंतीत्याशंक्य नेकार्यकालपक्षमाश्रित्यवचनाद्योर्हिसिद्धेनेदंवचनास्त्रयमस्ति अस्ति।
स्यादेतस्यवचनेप्रयोजनंकिंयत्सिद्धेप्रगृह्यसंज्ञाकार्यंतदर्थमेतत्स्यात् ॥ ॥ ॥

प·रि·
टी·
११

वचनेप्रयोजनं ग्रहणेऽप्रगृह्यस्याऽननुनासिक इतीत्यत्र कार्यकालपक्षे ऽदसोमादित्यस्याणो प्रगृह्यस्येत्यनेनैकवा
क्यतापन्नस्यापि तद्देशस्थत्वेन अदसो मेरित्येतत्कार्यस्य येतत्पातस्य पूर्वत्वाभावात्पूर्वत्रासिद्धमिति पूर्वत्र ग्रहणेन अ
ग्रहणे ऽसिद्धत्वस्यैवाभावात् अत्र इत्यादौ अप्रगृह्य इति पर्युदासार्थत्वेनैव चारितार्थ्यात् सामर्थ्याच्चापादीन्वाधि

तुमन्तस्य हने इति तद्धाशयः कार्यकालपक्षे परिभाषावत्त्वं तासां शास्त्रस्य स्वदेशे व्यथ्यग्वान्मार्थबोधेनुव्यवहर्तव्यापेनतस्य
तद्देशापत्त्यव्यवहाराभावात्सर्वैमेतदसमञ्जसं भवेत् इत्याभिप्रायेण परिभाषानां कार्यकालपक्षे मञ्ज्ञाशास्त्रस्य विशेष
माह ५

॥

नचैतद्भाष्यप्रामाण्यात्संज्ञाशास्त्रस्य तद्देशागमनेन तद्देशीयत्वाद्व्यवहारसत्त्वेपि सर्वपादसामर्थ्येन तत्त्वस्यापि ङलेभवतिरि
त्वात्तत्वाभावादसिद्धत्वस्यैवाभाव इत्ययुक्तमित्यत आह असिद्धत्वस्येति तत्त्वं हि कार्यार्थकार्यज्ञानमात्रं नत्वग्रे संभवोम
त्त्वप्रग्रहणो ग्रहस्यैत्वादिविधिप्रदेश एव। तद्देशस्य सवादसोमादित्यस्याददसो रिति सूत्रापेक्षया पूर्वग्रहणेन न ग्रहण
मितितत्वाभावादसिद्धस्यैवाभाव इति युक्तमेवेतिभावः पूर्वोक्तवत्प्रदेशवाक्यार्थबोधोत्तरमेव विरोधप्रतिसंधानात्
विप्रतिषेधस्तत्र प्रवृत्तावपि विधिप्रदेशस्य परत्वमेव निमित्तमिति न संज्ञाशास्त्रस्य विप्रतिषेधशास्त्रोपयोगि एव

असिद्धत्वस्य कार्यार्थतया कार्यज्ञानोत्तरमेव प्रवृत्तिः कार्यज्ञानं च प्रदेशदेश ए
वेति तद्देशस्यासिद्धत्वात्पूर्वग्रहणेनाग्रहणात् एवं तद्बोधोत्तरमेव विरोध
प्रतीति तत्रत्यपरत्वमेव विप्रतिषेधसूत्रप्रवृत्तौ बीजम् ॥ ॥

एवाक्यार्थबोधः अत्र प्रमाणं च समनंतरशोक्ताददसोमादिति सूत्रस्य भाष्योत्तरभाष्यमेव प्रमाणं तत्र हि विप्रतिषेधाद्धेतिवा
र्तिकव्याख्यानावसरे नैष युक्तो विप्रतिषेधः विप्रतिषेधे परमिति तत्त्वनेपूर्वाच प्रगृह्यसंज्ञा परेहि आपाद परत्वादिये
पराप्रगृह्यसंज्ञा करिष्यते इति समाधाय अनंतरसूत्रविपरिणामः कृतो भवतीति सूत्रविपर्यासाशंकायां एवं तर्हि परैव
प्रगृह्यसंज्ञा कथं कार्यकाले संज्ञापरिभाषं यत्र कार्यं तत्रोपस्थितं दृष्टव्यं प्रगृह्यप्रकरणेत्तु पाश्चिपन मिदं भवत्यदसोमादि

१

ननुसंज्ञाशास्त्राणां पृथग्धात्वर्थबोधानभ्युपगमेनप्रदेशवाक्यैर्नैवैकवाक्यतापांकार्यकालपक्षेगमनदेशस्यत्वा
त्पद्याद्दिसंज्ञानामिष्टंबाध्यबाधकभावोनसिध्येत्तथाचराज्ञेस्यात्यादौनलोपःप्रातिपदिकांतस्येत्येतद्वाक्यैकवाक्य
तापन्नपदसंज्ञापेक्षपाअल्लोपोनस्येतरद्वाक्यैकवाक्यतापन्नभसंज्ञायामपरत्वनिरवकाशत्वयोरभावाद्बाध्यबाध
कभावानापत्यातदेकवाक्यतापन्नभसंज्ञायांनलोपेतिवाक्यैकवाक्यतापन्नपदसंज्ञापाः पूर्वत्रासिद्धमित्यसिद्धत्वात्सर्वत्र

अतएवकार्यकाल्पपक्षेअपादिभ्यःपरैवप्राग्दसेसंज्ञेत्येतदसोमादितिसूत्रभाष्येउक्तं
आकडारपधिकारास्यभपदसंज्ञाविषयेतुपर्योदेशपक्षएवतत्रपरत्वेनैवबाध्यबाध
कभावः पदादिपदानांतत्रज्ञानशक्तिग्रहेशेषवत्रिपाद्यामपिव्यवहारः

त्रिपाद्यामपितदनतरंतदेकवाक्यतापन्नपदसंज्ञापाःप्रवृत्तौबाधकाभावान्नलोपापत्तिरित्यतआह आकडाराधिकार
ति नचैवमपिपचिभ्यांत्वादिष्टसर्वनामभ्यामेस्मादीनामाकडारोपसंज्ञानांकार्यकालपक्षानभ्युपगत्रिपाद्यांप्रवृत्तिर्न।
स्यात्तथाचराज्ञभ्यां। मत्यादौनलोनलोपेक्तनेव्यपदसंज्ञायाभावान्नलोपानापत्तिरित्यतआह पदादिपदानामिति

नन्वाकडाराधिकारस्थमपदादिसंज्ञाविषयेयेपयोदेशयत्तस्यैवाअपरेणोत्र पायांवजानराणितिपहेणैवनिर्वाहेअनंतस्य
विकारेअंत्यसदेशस्येत्यस्याःपरिभाषायाः प्रयोजननिएकरणावसरेअनकारांतस्याल्लोपेप्रयोजनं ततएण तत्तोइति
तइत्यत्रापिप्राप्नोत्यनंत्यविकारेअंत्यसदेशस्यकार्यंभवतीतिनदीर्घोभवति एतद्वपिनास्तिप्रयोजनं अनाकारंविशेषणि
ष्यामः अनोघोकारइति एवमपिअनसाअनस्तइत्यत्रापिप्राप्नोति अनकारेणांगंविशेषयिष्यामः अनाअकारस्य अका
रांतस्यानोपोकारइति एवमपि अनस्वतणा अनलदणांइत्यत्रापिप्राप्नोति एवंतर्हिकार्यकालसंज्ञापरिभाषंयत्रकार्यंत

अतएवपूर्वत्रासिद्धमितिसूत्रेपरिभाषाणामेवत्रिपाद्यामप्रवृत्तिमाशंक्यका
र्यकालपक्षेसमाहितमित्याहुः

तत्रोपस्थितंदृष्टव्यंभस्येतितत्रोपस्थितनरिदंनवस्तिपविभमित्यीति प्रयोजनोयथादनपूर्वकनिराकरणपरंभसंज्ञा
याःकार्यकालविषयकंष्यङःसंप्रसारणमितिसूत्रस्थभाष्यविरुद्धेनेतिते चेत्र पूर्वत्रासिद्धमितिसूत्रस्थभाष्यविरोधे
नतस्यएकदेशस्यक्तित्वेनाविषयादितिसूचयन् पदादिपरामांत्रिपाद्यामपिजातशक्तिपहेणैवनिर्वाहान् नतत्रकिंचि
त्कर्थंकार्यकालपक्षस्यप्रयोजनमस्तीत्यत्रैवप्रमाणंदर्शयति अतएवेति ॥ ॥ ॥ ॥

यथोद्देशांगीकारेपिजातशक्तिग्रहेणानिर्वाहिदेवेसर्थः इदंहितत्त्वंभाष्यं पदिसपादायांसमाध्याय्यांमयंपादोनोध्याय
ग्रसिद्धइत्युच्यतेपेरइहसप्तमीनिर्देशाःपंचमीर्निर्देशाः षष्ठीनिर्देशाश्चोच्यंतेतेप्यसिद्धाःस्युः तत्रकोदोषः फलेफले
ह्रस्वादंगगात्संयोगांतस्यलोपः इत्येतेषांनिर्देशानामसिद्धत्वानस्मिन्निति निर्दिष्टेपूर्वस्यतस्मादित्युत्तरस्यषष्ठी
स्थानेयोगा इत्येतोःपरिभाषानप्रकल्पेरन् नैषदोषः यद्यपीदंतत्रासिद्धंतथापि इहपिकेथंकार्यकालसंज्ञापरिभा

षंयत्राकार्यंतत्रैवावस्थितंद्रष्टव्यमिति पदिसंज्ञाविषयेनासान्निपायांप्रवृत्तेपेकार्यकालपक्षोभिमतस्त्वेते परि
भाषावतद्विषयेपिशंकासमाधानं चयतङ भयंचक्रव्यंस्यातदनुत्पन्नातद्विषयेतदर्थःकार्यकालपक्षोनावेति।
भाष्याभिमतम् अन्यथासंज्ञाविषयेपि शंकासमाधानतन्मन्त्वेविशिष्यतडक्केरसंगत्यापत्तेरतिभावः आद्गुरि
त्यस्यकेचित्प्रिमनेनाचयः

यथोद्देशपक्षस्य दुर्बलत्वं शंकां विघटयंस्तत्र प्रमाणमाह यथोद्देशपक्ष इति प्रथमपरिभाषार्थमुक्त्वा ह्यनी
पंचकमारभते कार्येण संस्कारायेति एकोपणचीत्यादिभिः शास्त्रैः स्वविधेयं यणादिरूपेण कार्येण स्वसंस्काराय
स्ववाक्यार्थबोधाय स्वप्रवृत्तिसमन्यंतादिरूपं यल्लिंगं तेन विहितानां तस्मिन्नित्यादिपरिभाषाणामाक्षेप इत्यर्थः एतेनो

यथोद्देशपक्षः प्रगृह्यसंज्ञाप्रकरणे भाष्ये कार्यकालमित्यस्य च कार्येण का
लेन संनिधिः प्राप्यत इत्यर्थः कार्येण स्वसंस्काराय स्वप्रवृत्तिलिंगविहितप
रिभाषाणामाक्षेप इति यावत् अत एव पूर्वत्रासिद्धमिति सूत्रे भाष्ये त्रिपाद्या असि
द्धत्वात्तत्रैव सपादसप्ताध्यायीस्थपरिभाषाणामप्रवृत्तिमाशंक्य यथोद्देशं तत्रासि
द्धत्वेहमित्युक्तानां तासां सिद्धिरित्यभिप्रायकेपि कथमिति प्रश्ने कार्यकालं सं।
सिद्ध ज्ञापरिभाषं यत्र कार्यं तत्रोपस्थितं द्रष्टव्यमित्युक्तम्

भयोरेवेनत्वात्तत्र परिभाषायाः कथं सान्निध्यप्राप्तिः कुतो न सर्वत्र सर्वासां तदापत्तिः असिद्धे च कथं तासामुपस्थितिः इत्या
क्षेपत्रयमपि समाहितं वेदितव्यम् आरोपिताकांक्षैव दोषत्रयस्य निरस्तत्वात् अचेतनत्वेपि आरोपिताकांक्षैव स्वप्रवृत्तिलिंग
विहितपरिभाषाणामाक्षेप इत्यत्र प्रमाणमाह अत एवेति कार्येण परिभाषोपस्थापनादेवेत्यर्थः एतेन कथमसिद्धे तदु
पस्थितिरिति तृतीयदोषोद्धारोपि स्पष्टीकृतो विदितव्यः पूर्वत्रासिद्धमिति सूत्रस्थभाष्यानुपूर्वी तु प्रागुक्ता स्मर्तव्या ॥ ॥

नन्विकोगुणवृद्धीतिगुणभाष्येनतच्छेषतदपवादपक्षतदुभयपक्षाणामादरेणान्यदेवेदंपरिभाषान्तरमसंबद्धमनया
परिभाषयापरिभाषान्तरमितिचमत्वाक्रोष्टीयाःपठन्तिनियमादिकोगुणवृद्धीभवतोविप्रतिषेधेनेतीतिक्रोष्टीयम
नावलम्बनेनपक्षान्तरावलम्बनावसरेऽग्रेगत्वानैषयुक्तोविप्रतिषेधःऽप्रतिषेधेपरमित्युच्यतेऽपूर्वप्राप्त्ययोगःप
रोनियमइत्याशंकितम् अनन्तरेचपरेचपरशब्दस्येष्टवाचकत्वमादायसमाहितमित्यन्यदेतत् परंतुतत्रनैषयु

नचकार्यकालपक्षेङमोह्रस्वादित्यादौतस्मादित्युत्तरस्यतस्मिन्निति परिभाषाद्वयोपस्थितौपरत्वादुभयपत्ति
ई शेषंचमिनिर्देशोबलीयानितितस्मिन्नितिसूत्रभाष्यासंगतिरुभयोरेकदेशस्थत्वेनपरत्वादित्यस्यासं
गत्यापत्तेःस्पष्टंचेदमिकोगुणइतिकैयटेइतिवाच्यम् विप्रतिषेधइतिसूत्रेऽष्टाध्यायीपाठक्रमपरत्वस्या
श्रयेणादोषात् नहिकार्यकालपक्षेऽप्येतावतानदर्पेनपक्षद्वयेपिप्रदेशेषुस्वबुद्धिजननेनाविशेषात्
नहितत्पक्षेप्याचेतनस्यशास्त्रस्यस्वदेशंविहायतद्देशगमनंसंभवतिनाप्यसदादिवद्बुद्धिजननेनस्वदेश
त्यागोभवति अतएवभाष्येएकदेशस्यैवसर्वशास्त्राभिज्वालकत्वमुक्तम् ॥ ॥

कइतिप्रतीकमुपादायेष्टसिद्धयेइत्यर्थःयथोद्देशपक्षेपरिभाषयोःपौर्वापर्येणतुकार्यकालतायामितिकैयटः
एतत्कैयटानुरोधेनकार्यकालपक्षेतस्मिन्नितिभाष्यासंगतिमाशंकते नचेति अष्टाध्यायीपाठक्रमपरत्वमादा
यासंगतिंपरिहरति विप्रतिषेधसूत्रइति तदेवोपपादयति नहीति कैयटस्यैवपूर्वापरविरोधंदर्शयितुमाह
अतएवेति ॥ ॥ ॥ ॥ ॥

नन्विको गुणवृद्धी इति सूत्रस्य कैयटस्य का गतिरित्यत आह इको गुणेति तस्मिन्निति सूत्रस्य भाष्यविरोधात् स्वग्रंथ
विरोधाच्चेति भावः स्वग्रंथस्य अथ यत्रोभयं निर्दिश्यते किं तत्र पूर्वस्य कार्यं भवति अहोस्वित्परस्येति उभयनिर्देशे विप्र
तिषेधात् पंचमीनिर्देशो भविष्यतीति तस्मिन्निति सूत्रस्थभाष्यं तत्र विप्रतिषेधादिति प्रतीकमुपादाय सूत्रपाठापेक्ष
या परत्वस्य व्यवस्थापकत्वमित्यर्थ इति कैयटग्रंथः तथा चात्रैवं फलति तस्मिन्निति सूत्रस्य भाष्य कैयटानुरोधेन कार्य

अत एव तस्मिन्निति सूत्रे कैयटः सूत्रपाठापेक्षया परत्वस्य व्यवस्थापकत्वमिति इको गुणवृद्धी इति सू।
त्रस्य कैयटस्तु चिंत्य एव अन्यथा सर्वशास्त्राणां प्रयोगार्थत्वेन प्रयोगरूपैकदेशस्थत्वेन क्वापि पर।
त्वं न स्यात् किंच क्ङिति चेति सूत्रस्य कैयटरीत्या विधिसूत्राणां यथोद्देशपक्षे परिभाषादेशे सन्नि
धानेन तेषां परत्वं व्याहन्येत एवं च वृत्तेभ्य इत्यत्रापि चेत्यतः परत्वाद्गुरुवक्ते फलेदिति एतादृग्धि
ये तत्फलम् ॥

कार्यकालपक्षे परिभाषाविषये अष्टाध्यायीपाठक्रमेण परत्वस्यैवाश्रयणम् आकडाराधिकारबहिर्भूतसंज्ञाविषयेऽप्यप
रैव प्रगृह्यसंज्ञेत्यदसो मादिति सूत्रस्थभाष्यप्रामाण्यात् देशक्रमेण परत्वस्यैवाश्रयणमिति न संज्ञापरिभाषयोर्वैलक्षण्यम्
परैव प्रगृह्यसंज्ञेति त्वदसो मादिति सूत्रे भाष्ये संज्ञापदेन तत्कार्यप्रकृतिभाव एवोच्यते अग्रे आशयानभिज्ञस्य प्रश्नः
कथमिति एकदेशिन उत्तरे कार्यकालमिति न तद्भाष्यविरोधः एवं च परिभाषावत्संज्ञाशास्त्रस्यापि त्व ॥ ॥

प.रि.शे.
टी.
१५
15

देशेवाकार्यबोधोऽस्त्येव लक्ष्यसंस्कारकत्वमपितुल्यमेव अतएवैतावदंशस्यदुष्टत्वसूचनायैवकेचिदित्युक्तम्।
अन्यथानदन्यस्यसर्वस्यसिद्धान्तत्वेनपरेत्वित्येववक्तव्यंस्यादित्याहुः इत्यकान्तदेतन्थानपन्नाहालमित्यवतारितंचते
रेवाकेचित्विदंनपरिसहन्ते तथाहि एकदेशीभाष्यविरोधपरिहारार्थमदसोमादितिसूत्रस्ययथाश्रुतभाष्यस्य अ
न्यथाव्याख्यानमनुचितम् तस्मिन्नितिसूत्रस्यभाष्यस्यपरिभाषाविषयत्वम् अदसोमादितिसूत्रस्यभाष्यस्यसंज्ञावि
षयत्वमितिविशेषविषयत्वान्नकश्चिद्विरोधः नचैवंतत्कार्यकालत्वात्परिभाषयोःपौर्वापर्याभावात्कथं।
विप्रतिषेधोऽतआह सूत्रपाठेतिति सूत्रपाठापेक्षयापरत्वस्यव्यवस्थापकत्वमितिकैयटग्रंथमवतार्य अत
एवाग्रेङमोह्रस्वादितित्रिपादिकमुदाहरणंसंगच्छत इतितस्मिन्नितिसूत्रस्यविवरणविरोधःस्यादितिवाच्यं
उभयनिर्देशेपंचमीनिर्देशोबलीयानितिपरिभाषाव्याख्यानपर अचीतिसप्तमीनिर्देशस्यमत्रङ्च इत्यत्र
चारितार्थ्यात् पंचमीनिर्देशोनवकाश इतिमूलग्रंथविरोधेनतस्मिन्नितिसूत्रस्यविभक्तिविशेषनिर्दे।
शस्यानवकाशत्वादयुक्तोयंविप्रतिषेधइतिभाष्यविरोधेनचतदुक्तेः सर्वत्रैवात्रकृतसमर्थ्यासप्तमी अकृ
तसामर्थ्यापंचमीतिकृत्वापंचमीनिर्देशोभविष्यतीतिभाष्यव्याख्यापरभाष्यस्यवत्वात्स्वार्थएवभविष्यती।
ति विवरणविरोधेनचतद्विवरणस्यप्राचिनमतानुसारित्वकलनेनविरोधाभावात्किंच अदसोमादि।

॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

तिसूत्रस्थमेवैवप्रगृह्यसंज्ञेति भाष्यस्यलक्षणयायातादेशार्थकल्पनेनप्रकृतिभावस्यपरत्वेपिप्रगृह्यसंज्ञापा:
यादिभि: परत्वाद्बाधितत्वेनतदंतरेणतदप्राप्तेश्चेत्याहु: अन्येत्वाहु: विशेषाविषयत्वान्नविरोधइत्ययुक्तम् न
हिपरिभाषाविषयकृतस्यविचारस्यतुल्यन्यायादत्रापिप्रसंग: सन्निवार्यतेतस्मात्तद्विषयकृतविचारस्यतुल्यन्या
यात्संज्ञास्वपिप्रसरइत्येव अन्यथाग्दहंसंमार्ष्टीत्यत्र वैदिकविषयेप्रवृत्त: प्रति प्रधानंगुणाहृतिरितिन्यायोलौ
किकविषयेनावतीर्येत विशेषविषयत्वस्य तत्राप्यविशिष्टत्वात् किंच अतिरात्रेषोडशिनंगृह्णातीत्यादि
स वैदिकविषयेषुप्रवृत्तेस्तथैवान्यत्राप्यवतरणंनभवेत् तस्मात्तुल्ययुक्त्यास्वविषयायान्यत्रापिप्रसक्तेस्तस्यविचा
रस्यस्वविषयमात्रसंकोचेकिंचित्प्रमाणंवाच्यम् असतिप्रमाणेसंकोचकल्पनस्याकिंचित्करत्वात् ननु
परेवप्रगृह्यसंज्ञेत्यदसोमादितिसूत्रस्यभाष्यमेवप्रमाणमितिचेन्न प्रगृह्यसंज्ञापदस्यतत्कार्यपर
त्वेलक्षणयैवोपपत्तौसामान्यत: प्रवृत्तस्यन्यायस्यस्वविषयमात्रेसंकोचकल्पनस्यायुक्तत्वा
त् यत्तु तस्मिन्नितिसूत्रेभाष्येङमोह्रस्वादचीत्यादौ विभक्तिविशेषनिर्दे
शस्यानवकाशत्वाद्युक्तोयंविप्रतिषेधइत्यग्रिमभाष्ये
॥ ॥ ङमुडपनिर्देशोविप्रतिषेधात्पंचमीनिर्देशइत्यस्य ॥ ॥ ॥

प.रि.शे.
टी.
१६
16

विप्रतिषेधे परत्वात्पंचम्याः प्राबल्यप्रतिपादकत्वेन अष्टाध्यायीपादव्यक्तन परत्वव्यवस्थापकस्य एकदेशयुक्ति-
त्वात् इति तदपि न यत्र ङमो ह्रस्वादचीत्यादौ पंचम्या अनवकाशत्वेन तदंशे न तथा सत्वेपि ङसिङ्योरित्यादौ उभयोरन-
वकाशत्वस्थले आमि सर्वनाम्न इत्यादौ चोभयोरवकाशस्थले न तथा कल्पनस्य प्रमाणपराहतत्वात् स्पष्टं चैतदुपरि-
ष्टादुभयनिर्देश इति परिभाषायां मूल एव यत्तु प्रगृह्यसंज्ञापदस्य तत्कार्यलक्षणायां प्रकृतिभावस्य परत्वेपि अ-
यादिभिः प्रगृह्यसंज्ञाबाधो भविष्यत्येवेति तच्चापि न युक्तम् कुत्रचित्प्रमाणसद्भावे सति संभवे विप्रतिषे‥धस्य
युक्तत्वेपि तदभावे युगपदसंभवविप्रतिषेध इत्यस्याचः परस्मिन्निति सूत्रस्थभाष्यप्रमाणकस्याभ्युपगमे अ-
यादिभिः प्रगृह्यसंज्ञाबाधस्यायुक्तत्वात् प्रत्युतानिमित्तानपेक्षत्वेनांतरंगत्वात्प्रगृह्यसंज्ञयैवायादीनां बाधः
तथा सत्ययादीनां प्रकृतिभावस्य च प्राप्तौ परत्वात्प्रगृह्यसंज्ञाकार्यप्रकृतिभाव एवेत्याशयेनोक्तम् भाष्यकृ-
ता परात्प्रगृह्यसंज्ञेति प्रगृह्यसंज्ञाकार्यमिति तदर्थः तस्मात्भाष्योक्तस्य प्रगृह्यसंज्ञापदस्य लक्षणयान्यार्थप-
रत्वेन किंचिदवद्यमिति दिक् ॥ ॥ ॥ ॥ ॥ ॥

॥ ॥ ॥

संज्ञाप्रसंगात्तद्विशेषभूतइत्संज्ञायाः उपस्थितौ तस्याः शास्त्रमूलत्वात्तच्छास्त्रस्यादावुल्लेखएव तद्विषयकपरि
भाषाद्वयस्याप्यादावुल्लेखः कर्तव्यइति वक्तुं प्राचीनानुक्तत्वात्तद्ग्रन्थेऽनुक्तांच दर्शयितुं प्रसंगतिपूर्वकमनेकांताअनुवं
धाइतिपरिभाषामवतारयितुमाह इत्संज्ञकाइति अनुबंधत्वंच इत्संज्ञाप्रयुक्तस्वलोपतदन्यकार्यजनकतावच्छेद।
कधर्मवत्त्वम् जनपदेलवितिजप्यमानप्रत्ययस्यानुबंधत्ववारणायेत्संज्ञेति उच्चारणार्थानामपीत्संज्ञेति मतेउ।
च्चारणार्थस्यानुबंधत्ववारणायतदन्येति तदन्यकार्यत्वंलोपरूपाभावभिन्नत्वेसति उच्चार्यमाणाधिकरणीधिकर

इत्संज्ञकानुबंधास्तेष्ववयवावयवत्वसंदेहेऽप्याह अनेकांताअनुबंधाइति अनेकांताअनवयवाइत्य
र्थः पोऽस्त्ववयवः स कदाचित्तत्रोपलभ्यतएव अयंतुनतथातदर्थभूतेविधेयेपकदाप्यदर्शनात् शि
शिकिदित्यादौसमीपेऽवयवत्वारोपेणसमासोबोध्यः ११ ॥

णीपलत्वासंपादकतावच्छेदकधर्मवत्त्वम् तेनतत्रस्वलोपातिरिक्तोच्चारणरूपप्रयोजनसत्वेपिननत्वदोषः न
न्वनुबंधानामनेकांतत्वेअनेकाल्शित्सर्वस्येत्यस्य संयोगाच्छिदिदित्यादिसूत्रघटकशितशिकिदादिपदेबहुव्रीहिरनुप
पत्तिः स्यात् शइत्यस्यकइत्यस्यैवावयवषष्ठ्यर्थाघटनात् प्रकृते अवयवत्वसंबंधादितिरिक्तसंबंधस्यषष्ठ्यर्थ
त्वासंभवाच्चघ्वसोरेद्धावभ्यासलोपश्चेतिसूत्रेशकारप्रश्लेषस्यानुपपन्नत्वाः स्यादित्यतआह शिकिदित्यादावित्ति
तस्यावयवत्वाभावेपितत्समीपवर्तिनितस्मिन् तत्सादृश्येनावयवत्वारोपमादाय अवयवत्वसंबंधस्यैवषष्ठ्यर्थ

सत्संभवात्तत्र बहुव्रीहेरनुपपत्तिरिति भावः

प. सि. शे.
टी.
१०
११

नन्वेवमपि गिरादित्यादावपि तथासत्वेन कुन्ठ्कण्ठ कठेत्यादौ णकारस्य ककारतद्भपसमीपवर्तित्वसंभवाच्च।
वत्क प्रत्ययस्यापि णित्वेन अरभ्यक इत्यत्र हो आर्धपक इत्यनिष्टमापद्येतेत्यत आह वुञ्छणकठादाविति व्याख्या।
नत इति प्रत्येकवाक्यरूपव्याख्यानादित्यर्थः एतच्च ज्ञापकस्याप्युपलक्षणमिति बोध्यम् ज्ञापकं चात्र प्रमाणेद्व
यसच् दघ्नञ्मात्रच इत्यत्र द्वयसजिति चित्त्वेनैव दघ्नचश्चित्त्वे सिद्धे दघ्नचश्चित्करणमेव नन्वेवमपि हलंत्यमि

वुञ्छणकठेत्यादौ णित्वप्रयुक्तं कार्यं पूर्वस्यैवेत्यादिव्याख्यानतो निर्णीयम् हल
न्त्यमित्यत्रान्त्यशब्दः परसमीपबोधकः ॥ ॥ ॥

त्यत्र अंत्यशब्दस्य अवयववाचकत्वेन अनेकांतत्वपक्षे अइउण् इत्यादौ णादीनामंत्यावयवत्वाभावात् ह
लंत्यमितीत्संज्ञानापत्तिरित्यत आह हलंत्यमित्यत्रेति स्पष्टं चेदं दाप्रतिषेधे दैप्यनेजंतत्वादिति वार्तिके दाधाघ्वि
निसूत्रे भाष्ये तत्र हि दाप्रतिषेधे दैपि प्रतिषेधो न प्राप्नोति अवदातं मुखम् ननु चात्वे कृते भविष्यति नत्वेवं न
प्राप्नोति किं कारणम् अनेजंतत्वात् सिद्धमनुबंधस्यानेकांतत्वात् सिद्धमेतत् कथमनुबंधस्यानेकांतत्वात्

१०

ननु नस्य लोप इति सूत्रे भाष्ये अव्ययस्यानुबंधस्यासंज्ञने किं सत्यैकांतो भवतीत्याहोस्विदनेकांत इति शंसय्य एकांत
त्वेनोपलब्धा एकांते इत्याकुतस्तत्रोपलब्धेः तत्रस्थो यस्मादुपलभ्यते न यथा वृत्तस्याशाखावृन्दे कांत उपलभ्यंत इति सो
पपत्तिकैकांतपक्षेव लंबितेन तत्रासन्नपसर्वादेशादा प्रतिषेधे एत्यग्निर्देशो नाकारांतत्वादिति अन्तन्नपविधौ कर्मण्यपशिष्या
दौ दिव उदीत्यादौ सर्वादेशो अदाविनिदा प्रतिषेधे एपङ्ग्दि·र्देशस्य कर्तव्यतायां चोदितायां मस्तनसैनेकांत इति पक्षो वलंबितः
तत्रापि यद्यनेकांतः विशेषानस्थित्यातोहूषमज्ञाव्यएवंतर इति च परिहृते तत्राप्यनंतर इति चेत्पूर्वपरयोरित्यनंतं प्राप्नोति वु
ण इति दोषमाशंक्य व्यवसितपाठादिना समाधायानंतरमुभयमिदमनुबंधेष्वेकमेकांता अनेकांत इति किमत्र न्याय्यम् ए

वस्तुत एकांतत्वेव न्याय्यम् शास्त्रेतत्रोपलंभादन्यत्रानुपलंभाच्च ॥ ॥

कांत इत्येव न्याय्यम् कुतः एतदत्र हि हेतुर्व्यवदिष्ट इत्युक्ताभगवता भाष्यकृता एकांतपक्ष एव सिद्धांतितः अनेकांतानुबंधर
तिपक्षस्तु लक्षणादित्रपदोषदुष्टत्वेन जघन्यत्वात् परित्यक्तः अस्मिन्पक्षे तत्रासन्नपेतियानि दूषणान्युद्भावितानि तानि एतत्संम
नंतरं भाष्यकृता निराकृतानि तथा च प्रथमदूषणस्य निराकरणं तु नानुबंधकृतमसारूप्यमिति कृतं द्वितीयस्य नानुबंधकृ
तमनेकाल्त्वमिति तीयस्य तु नानुबंधकृतमनेजंतत्वमिति तद्ज्ञापकं च तत्रैव भाष्यकृता स्पष्टीकृतम् उपरिष्टा–न्नोपि
स्पष्टीभविष्यति एवं सति एकांतपक्षस्य भाष्यपरिगृहीतत्वात्स एवाश्रयितुं युक्तः इतरस्य तु परिगृहीतत्वान्नोपदे
शात्वमित्याह वस्तुतस्त्विति एवोक्तेस्त्वेकदेशीयमतावलंबनेनेति भावः ॥ ॥ ॥

अनवयवोह्यीति घटेह्युपलभ्यमानः काकादियेन संबंधेन संबंधेनोपलभ्यते ततऊनोपि घटस्य रक्तादिषु गतानां संयो
गसंबंधेनैवोपलब्धिरिष्यतः काकादेः घटरक्ताद्यनवयवत्वं यथा तथा नानुबंधानामनवयवत्वे तेषामनेकाधिकरणे
एकजातीयसंबंधेनोपलभ्यमानत्वात् अपि त्वयवत्वं सत्त्वे स्वघटितसमुदायान्यादिवृत्तित्वसंबंधेन लक्ष्ये स्व
घटितसमुदायो यथा एकत्वसंबंधे स्वप्रतियोगिकाभावत्वसंबंधेन वोपलभ्यमानत्वादिति भावः नचलोपेन ल

अनवयवो हि काकादिरेकजातीयकसंबंधेन घटरक्तादिषूपलभ्यते नैवायम् एवंवद्
व्रीहिरपि न्यायत एव संपन्नः अन्यथादे लक्षणाचन किंचानवयवत्वेन शक घन्यपा
दौ काकादेरित्वानापत्तिः २ अन्ययादित्वाभावात् दण्डस्य स्वकारस्यार्थतापत्तेश्च इदं च न
स्यलोप इति सूत्रे भाष्ये स्पष्टं तत्रस्थ एकैकोऽनाअनुबंधा इत्येवं व्याख्यमिति दिक्

भ्यमानस्यानुबंधस्य तत्रासत्वात् कथमुपलब्धिविषयत्वमिति वाच्यम् लौकिकसन्निकर्षजन्यज्ञानविषयताभा
वे घटाभाववद्भूतलमित्यत्र भूतलवृत्त्यभावावच्छेदेनाप्रकारतया भासमानस्य घटस्यालौकिकसन्निकर्षजन्यज्ञान
विषयत्ववत्त्वस्य तद्विषयत्वे बाधकाभावात् ॥ ॥ ॥ ॥

तस्यलोपइति सूत्रेभाष्ये एकांतत्वपक्षेनत्रासत्त्वपसर्वादेशप्रतिषेधेष्टघ्यङ्गि:देशोनाकारांतत्वात्त्रासत्त्वपविशेषोभ
वतिकर्मण्यण्‌ आतोनुपसर्गेक इतिकविषयेऽण्णपिप्राप्नोतिसर्वादेशेचदोषोभवतिदिव औत्सर्वादेशः प्राप्नोतिदा
प्रतिषेधेष्टघ्यङ्गि:देशःकर्तव्यःअदाप्दैपावितिवक्तव्यम्॥ किंपुनःकारणंनसिध्यतिअनाकारांतत्वान्नचानुचात्वे
भविष्यति तद्दरात्वंनप्राप्नोति किंकारणमेनेजंतत्वादितितत्रासत्त्वपेतिवार्त्तिककृताना — व्याचभाष्यकृतापका

नन्वेकांतत्वेनेकालत्वादेवेशादीनांसर्वादेशत्वसिध्यानेकालस्त्रेशिदग्रहणंव्य
मतान्त्रा र्थेह नैनुबंधकृतमनेकालत्वं शिद्ग्रहणमेवतद्ज्ञापकम्‌ तेनाचेणस्त
इत्यादेर्नसर्वादेशत्वम्‌ ॥

तपक्षसिद्धांतकरणात्पूर्वदूषणमुद्भावितम्‌ तदुद्धारस्तुभाष्यकृतातदनंतरमेवस्पष्टीकृत इति एकांतपक्षस्य
दोषदुष्टत्वंनाशंकनीयमितिदर्शयितुंक्रमेणभाष्योक्तमेवोद्धारंप्रकटयन्‌ संगति माह नन्विति ज्ञापनफलमा
॥ ॥ ह तेनेति ॥ ॥ ॥ ॥

नन्वेवंसतिलुटः प्रथमस्यडारौरसइतिविहितानांडादेशानांसर्वादेशत्वानापत्तिरितआह डादिविषयेत्विति ननुजस
शीइतिसूत्रेनचार्वर्णाइत्यत्रअनबंधत्वपोग्यक्तनकालत्वंनेतिपरिभाषार्थसंस्कृत्यक्तैनेवसिद्धांतित्वात् अनेनैवआनु
पूर्व्यासिद्धमितिकथममभुक्तम् स्वयुक्तास्वस्यविरोधात् अन्यथातत्रत्यसिद्धानासंगत्यापत्तेरितिचेन्नमूलहृदन्तु

उदिविषयेत्तसर्वादेशत्वंविनानवंधत्वस्यैवाभावेनानुपूर्व्यात्सिद्धं नन्वेवमपिअवदातं
मुरवमित्यत्रयलोपोनरमानेदाविनिद्रुसंज्ञाप्रतिषेधोनस्यात् दैपः पकारस्यत्वेनेजंत
त्वादात्वाप्राप्त्यापलोनरपकाराभावेनास्यत्तद्भावादित्यतआह नानुबंधक्तनमनेजं
तत्वम् उदीचांमाङि॰तिनिर्देशोस्याज्ञापकः आदेच उपदेशइतिसूत्रेणोपदिश्यमाना
सैजंतस्यात्वंक्रियतेङ॰कारस्तत्वेपजंतत्वाभावादात्वाप्राप्तेरलस्यासंगतिः ॥

होधित्वेनैनग्रंथस्यविरोधाभावात् नन्वेवमपिडादीनामनेकाल्त्वाभावेनसर्वादेशत्वमनुपपन्नंस्यादितिवा।
च्यं प्रसंगेणैणाप्यनेकत्वमादायसर्वदेशत्वसिद्धावनुपापत्तेरभावात् अतएवस्वस्यानभिमतत्वसूचयेव डादि
विषयेत्विनितुशब्दः मभुक्ता इदानींसर्वादेशेहृ—णं परिहृत्यादाप्रतिषेधेदूषणंपरिहरन्नेपरिभाषांतरमारय
त्वाहा नन्वेवमिति ॥ ॥ ॥ ॥

असामवस्थायामिति अनुबन्धलोपे कृते एव धातुसंज्ञा न तु ततः प्रागिति तथा तु लोप इति सूत्रे भाष्यकैयटयोः स्पष्ट
त्वात्सानुबन्धे हि धातुत्वाभावोपि तिङ्गविकलमेतत् तथा च आदेच उपदेशेऽशितीति ग्लात्वाप्राप्तिः तत्रैकाङ्गवैकल्य
तुमाङि तिनिर्देशेन त्वानुबन्धकृतमनैजन्तत्वमिति निवार्यते अवशिष्टं तत्त्ववारयितुं वार्यते तच्च नान्तरप्रसंगात् सूच
पितस्मिन्फलांसराभावाच्च तदनिवारणे च निवारितमप्ययुक्तं भवेदित्याशयेनाशङ्कते नचेति आदेच इति सूत्रे लि।
टि धातोरनभ्यासस्येति सूत्रात् प्रकृतस्य धातोरित्यस्यानुवृत्तेरप्युपगमात् मेङ् इत्यस्य धात्वङ्गविकलत्वाभावात् ननु प्र

नचास्यामवस्थायां तस्य धातुत्वाभावात्कथमात्वम् तत्र धातो
रित्यस्यानिवृत्तेरित्यन्यत्र विस्तरः

कृतस्य धातोरित्यस्यानुवृत्तावेजन्तधातुमात्रस्यात्वादेशप्रसक्तौ गोभ्यां नौभ्यां ग्लौकिनाऽरे इत्यादीनामात्वादेशाप्रवृत्ति।
रित्यत आह उपदेशेत्रेति आदेच इति सूत्रे शब्देन्दुशेखरे इति भावः तत्र हि उपदेशे इति षष्ठ्यर्थे सप्तमी तेन यत्स्योपदिश्य
मानत्वं नतु तत्स्वयस्येत्यर्थः कर्मव्युत्पत्त्योपदेशपदेन आद्योच्चारणविषय उच्यते तेन ग्लौकिनै इत्यादौ न दोषः समु
दायस्योपदिश्यमानत्वे न तु तदवयवस्य तदुपदेशेनान्यपर्याभवात् उपदेशे किं गोभ्याम् उद्देशस्य प्रातिपदिकानां
नोपदेशः उणादीनामव्युत्पत्तेश्च ॥ ॥ ॥ ॥

प॰रि॰शे॰
टी॰
२८

ऊरित्यादीनामुपदिश्यमानेजंतत्वमितिनवाच्यम् तादृशऋत्रायेणधातोरेवेत्यतोधातोरित्युक्तमित्युक्तभम् प्रा
येणोपदिश्यमानेजंतात्सु धातोरेव आपातीत्यतोमूलेधातोरित्युक्तं प्रकृतनधातोरित्यस्यानुवृत्तौनतात्पर्यम् ढौकि
तागौभ्यामित्यादावात्वंवारणमप्येतावनैवभविष्यतिनदाशपः अतएवमाङि॰तिनिर्देशस्सानुबंधकृत न
मनेजंतत्वमित्यर्थयुक्तंभवति अन्यथाधातोरित्यनुवृत्तावनुवंधस्याजोपोन्तरतद्धिनिर्मुक्तस्यैवनधातुलोपऋ
तिसूत्रस्थभाष्योक्तधातुत्वेनउदीचांमाङो इत्यादौआत्वानापत्यातदयुक्तंस्यात् नचऊरेव प्रकृतीनामुपदेशो
पजंतत्वादात्वयाहृतयेधातोरित्यावश्यकमितिवाच्यम् शितिनेत्युक्तत्वाछित्यपरत्वयोग्यस्यैवैजंतस्य
ग्रहणेनादोषात् इदमपिसर्वंतत्रैवस्पष्टमितिवो—व्यम् तस्माद्धातोरित्यस्यनिवृत्तावपिनदूषणं अस्ति।
जोरनार्षयोरितिसूत्रेभाष्यकैयटयोर——स्पष्टंचेदंद्रष्टव्यम् तत्रहिष्यङि॰त्यादेशोवाप्रत्ययोवेतिविचारप्रसं।
गेप्रत्ययवादिनीङि॰त्मात्रानुवंधस्वीकारेणपङः संप्रसारणमितिन्यासेभ्युपगते आदेशवादिना ल्यपेत्यत्र।
संप्रसारणमाशंक्यतेनचव्यवधानेनेतीतिवारितेपिलिटैधातोरित्यानोधातोरित्यनुवृत्त्यायङ॰तस्यधातोः प
तिपत्रयोरित्यर्थाभ्युपगमेनपुनरादेशवादिनादोषः आशंकितः धातोग्रहणंनानुवर्ततेनास्यतिप्रसं।
गइत्याशयेनधातुग्रहणस्यरह ॥ ॥

२०

स्यात्तंनास्तीतिकृत्वाएवनिश्चयः क्रियतेइतिप्रत्ययवादिनानिराकृतेचअनंतरं चावक्ष्यमाणार्थंधातुग्रहणंक

र्तव्यम् इहमाभूत् गोभ्यांगोभ्यः नौभ्यांनौभिरिरित्यादेशवादिनाचोदितम् प्रत्ययवादिनाच आर्थार्थ

यदिकर्तव्यं तत्रैवनत्करिष्यते उपदेशेपदेजंतंतस्यचेदात्वमिष्यते उदेशेरूढिशब्दानांतेनगोर्नभविष्यति।

एवंतर्हिउपदेश इत्युच्यते उदेशश्चप्रातिपदिकानांनोपदेशः इतिपरिहृतम् तत्रा—र्थमितिप्रतीकमु

पादायएतत्प्रयोजनार्थंव्याख्यानमित्यर्थः उपदेश शब्देनशास्त्रमुच्यते तेनशास्त्रेपठितायेएजंतास्तेषामा

त्वं विधीयते प्रातिपदिकानितुनप्रतिपादशास्त्रेपठितानि किंतर्हि प्रकृत्यादिविभागकल्पनाद्वारेणसा

धुत्वेनप्रतिपादितानि ॥

॥ ॥ ॥ ॥

प·दी·शे
टी·
२१

५१

ननुनोङ्गरचष्टन् गोमयवः इत्यादावुपदेशेपानिप्रातिपदिकानिपठितानि तेषामात्वप्रसंगः एवंतर्हिगोतो
णोदिति णित्वातिदेशाज्ज्ञापकात्तेषामात्वाभावः अहि आत्वेगोशब्दस्यकृते णित्वस्यास्ति प्रयोजनम् एवंत
र्ह्यन्यपदत्तोपिनिर्दोष इतिकैयटः तथाचैतद्भाष्यके टाटाभ्यांधातोरित्यस्यानुवृत्तौनप्रयोजनम् नाप्यननुवृ
त्तौदूषणमितिनाद्यानुवर्तत इति सिद्धंभवति। एवंस्पृष्टस्यपष्टटीका दाप्प्रतिषेधेदैप्यनेजन्तत्वमितिवार्तिक

स्पष्टंचेदंदाधा— त्विसूत्रेभाष्ये ॥

कृताप्रतिषेधश्चोदितः भाष्यकृताचअनेकांतानुबंधपक्षमादायनिराकृतः अनंतरमप्यैकांतेषुदोषएवेत्याशं
क्यपकारलोपेनरमात्याभ्युपगमेनभूत एवंगत्वादाम्नाश्रयणेनप्रथमंतामाशंकानिराकृत्य अथवाआचा
र्यप्रवृत्तिर्ज्ञापयतिनानुबंधकृतमनेजंतत्वमिति पदपमुदीचांमाङोव्यतीहारे इतिमेङः सानुबंधपेस्य।
ग्रहणंकरोतीतिप्रकारांतरेणैवनिराकुर्वताभाष्यकृताचेदंदाधा— त्विसूत्रेस्पष्टीकृतमित्याहस्पष्टंचेदमिति

२१

नचवार्त्तिकोक्तं दूषणमुद्धयमुद्धृत्य सरूपेति तत्रीयं दूषणमुद्धर्त्तुं नानुबंधकृतमसारूप्यमिति परिभाषांतर
यति नन्वेवमपीति इदं च असरूपशब्देन मित्रत्रूपपवर्गस्य तेन न तु सरूपानुसृतिः सचऔपदेशिक इति प्रक्रां
ते यद्येवमनुबंधभिन्नेषु विभाषाप्रसंगः अनुबंधभिन्नेषु विभाषा प्राप्नोति कर्मण्यण् आतोनुपसर्गे कः वि
षयेऽप्यणपि प्राप्नोतीति सिद्धमनुबंधस्यानेकांतत्वात्॥ सिद्धमेतत्कथमनुबंधस्यानेकांतत्वात् अनेकांता अनु

नन्वेवमपि वासरूपसूत्रेणैकविषयेऽणोऽप्यापत्तिरत आह नानुबंधकृतमसा
रूप्यम् ददातिदधात्योर्विभाषेति णबाधकशास्यविकल्पविधायकमस्याज्ञाप
कम् तेन गोदइत्यादौ नाणिति वासरूपसूत्रे भाष्ये स्पष्टम् ॥ ॥

बंधा इत्युक्तत्वामर्थ्यात्किंचित्पक्षांतरं स्वीकृत्य पुनरेतस्मिन्नेवावलंबिते अथैकांतेषु दोष एवेत्याशंक्य एकांतेषु च न दो
षः आचार्यप्रवृत्तिर्ज्ञापयति नानुबंधकृतमसारूप्यं भवतीति यदयं ददातिदधात्योर्विभाषां शास्तीति समादधता भा
ष्यकृता वासरूपेति सूत्रेऽपि स्पष्टीकृतमित्याह इति वासरूपसूत्र इति अत्र वासरूपेणेति तस्य लोप इति सूत्रेऽस्याप
पलक्षणं अत्र तस्य लोप इति सूत्रस्य भाष्योक्तपूर्वोक्तदोषोद्धारकमत्र विशेषाभावान्नाहतइति विवेक्तव्यमिम

इत्संज्ञाप्रसंगात्संख्याव्ययेत्यादिसंज्ञाविशेषोद्देश्यकविधेः कृत्रिमस्यैवग्रहणमितिनिरासायउभयत्रा रिह
भवतीतिपरिभाषान्तरमवतारयति नन्वित्यादिना एवंचप्रसंगसंगतेः सूचितत्वान्नात्रास्यासंगतत्वमाक
लनीयम् तच्चात्रसंख्याग्रहणेनबह्वादीनामेवग्रहणंनलोकप्रसिद्धैकाद्यादीनामित्यत्रविनिगमनाविरहः

ननुसंख्याग्रहणेबह्वादीनामेवग्रहणंस्यात्प्रकरणस्याभिधानियामकत्वप्रसि
द्धत्वात्कृत्रिमाकृत्रिमयोः कृत्रिमस्यैवकार्य्यसंप्रत्ययइतिन्यायात् ॥

संख्याशब्दश्रवणेसांकेतिकानदतिरिक्तार्थबोधस्यैवनिरूढत्वादित्यतआह प्रकरणेपीति यद्यस्यसंकोचेमा
नाभावादुभयोरर्थबोधस्यानिष्प्रत्यूहत्वंनथापिसैंधवमानयेत्यादौभोजनादिप्रकरणेउभयार्थबोधस्यनिष्प्र
त्यूहत्वेपिप्रकरणेनशक्तिसंकोचवदत्रापितेनसंकोचःसंभवानीतिभावः ॥ ॥ ॥

ननु सैंधवमानयेत्यादौ स्वव्यवहितस्यैवोपक्रमत्वरूपप्रकरणस्य सत्त्वेन शक्तिसंकोचेपि प्रकृते भोजनादिवत्तथावि

धस्याव्यवहितस्याभावेन शक्तिसंकोचे प्रमाणाभाव इत्यत आह अस्ति चेति तयोश्च प्रकृते तथाविधप्रकरणाभावे

पि बहुवारणवत्रिति सूत्रेण वह्व्यादीमांसेरथ्यासंज्ञाप्रकृतेनसूपस्थितिरूपप्रकरणं सत्यपि तस्मिन्नेतावता तस्य शक्ति

संकोचत्वं संभवति सैंधवादिस्थाले भोजनप्रकरणं अश्वस्यबाधात् लवणस्यैव तत्र ग्रहणं संभवतीति प्रकरणस्य

शक्तिसंकोचकत्ववत्प्रकृते तथाविधत्वासंभवेन तस्य तत्त्वाकल्पनापि अत उक्तम् कृत्रिमाकृत्रिमयोः कृत्रिमे का

र्यसंप्रत्यय इति ननु एतन्न्यायेन नदीपौर्णमास्याग्रहायणीत्यत्र प्रत्याहारे नदीति नदीसंज्ञाविधानात्कृत्रिम

त्वात्संज्ञिनो ग्रहणं स्यादिति चेन्न पौर्णमास्याग्रहणसामर्थ्येन संज्ञिनो ग्रहणाभावात्तापनेनादोषात् नच पौर्णि

॥ ॥ अस्ति च ॥ ॥

मास्याग्रहायणीग्रहणं नियमार्थम् इकारान्तानां पर्यायि तद्धेतप्योरेवेत्येवाच्यम् तथा सति ऊ पौर्णमास्याग्रहाय

णीति वक्तव्येन नदीग्रहणसामर्थ्येनैव तथाविधनियमस्याभ्युपगमात् नच नदीसंज्ञकोकारग्रहणायैव नदीग्र

हणं चरितार्थमिति वाच्यम् पौर्णमास्याग्रहायणीशब्दस्याहच पाडकारान्तस्यापि नदीसंज्ञकस्यैकग्रमितिक ।

स्यनेन तद्ग्रहणवैयर्थ्यस्य स्पष्टत्वात् एवमपि तद्विशेषाणां गंगायमुनेत्यादिनामपि ग्रहणं कुतो नेति चेन्न श

रत्प्रभृतिषु विपाटशब्दसामर्थ्येनैव तच्चारणात् नन्वेवमपि कृत्रिमे तन्न्यायेन युक्तः नदीभिश्चेत्यत्र संसिनो ग्रहण

पत्तेः अएनयोरिति वन्न यान्येकद्विवचननिर्देशेनैव सिद्धे बहुवचननिर्देशसामर्थ्यादेव तद्धारणसंभवादितिदिक्

प॰रि॰
टी॰
२३

स्यकारणत्वासंभवात् इत्यतआह अतएवेति विप्रतिषेधसूत्रेभाष्येअंतरंगचानंतरंगवलीयोभवतितिवक्तव्यमित्युक्त्वाकिंप्रयोजनमिति।
एष्टेयरोकादेशेत्वोत्वात्रिगुणवृद्धिर्वचनाल्लोपस्वरेभ्य इतिसामान्यत उपयाघगुणापेक्षयायणादेशस्यांतरंगत्वेकिमुदाहरणमितिदिशे
षाकांक्षायांगुणायणादेशः स्योनस्योनाइत्युक्तम् यदिपरिभाषायाः पूर्वोक्तार्थःस्यात् गुणाद्यंतरंगइत्यपिवक्तंस्यात् तच्चनोक्तम् तदनु।
क्ताभाष्यकाराणांनादृशोऽर्थोनाभिमतइतिपत इतिभावः ॥ ॥

मर

ननुप्रकृतसूत्रेभाष्ये अंतरंगेचेत्यस्यप्रयोजनेपेटिकायांगुणाद्वृंतरंगेत्वादित्यनुक्त्वापिनैसेनाष्टशः परिभाषा।
र्थेभवतीतिकल्पमित्युक्तम् उदाहरणानुदाहरणमात्रस्य अर्थसाधकत्वतदसाधकत्वाभावात् उपलक्षणतयापि
नउपपन्नेश्च अत एवबहुद्योतत्वन्त्वज्ञावगरोभ्यानुम् एवंविप्रतिषेधेनेतित्वज्ञावविषयकविप्रतिषेधस्यप्रियक्तोऽपि
ने अरणपायेतिभाष्योदाहरणमात्रान्नवैकल्पिकत्वन्त्वज्ञावमात्रविषयकत्वमित्यतआह प्रायस्यादिति तदं

प्राथम्यान्तदेववावक्तुमचितं ममत्वंतरंगपरिभाषयानद्धारणाभावान्नोक्तम् किं
चसिद्धान्तेनित्यत्वागरणात्पूर्वंन्त्वगुणस्तुऊदित्यणवाधितत्वादनित्यः अतश्चह्यमा
श्रित्येत्यादिभाष्येणचपरिभाषायामंगशब्देनसम्भव्याद्येनयोपात्तशब्दस्वरूपंनिमि
त्तमेवगृह्यतेइतिस्पष्टमेवोक्तम्

त्रानद्संभवादितिभावः एवंतर्हिप्रकृतपरिभाषायास्लाष्टशार्थेऽंगीकृतेकथंभाष्यसंलग्नंभवेत् अवोंत
रंगत्वाभावेपरत्वाद्गुणादेशेभाष्यमनुपपन्नंभवेदतस्तदन्यथानुपपत्त्यैवतदर्थागीकर्तव्यमित्यतआह किंचे
ति ॥

येनविधिस्तदंतस्येति सूत्रे स्योन इत्यस्य व्याख्यावसरे उपसंहारे यदि च श्वःकोपयणचीत्यत्र नदादिन दंतविधिः स्थानांतनदापयणादेशस्यांतरंगत्वा
भावात्परत्वाद्गुणः स्यादित्युक्तं कैयटेन तदुक्तं च गुणस्यांतरंगत्वप्रतिपादकोन शब्दमाश्रित्येत्यादिभाष्यविरोधेन खंडयति यत्विष्यादिना
पदान्तनत्रत्यपरत्वादित्यस्य परशब्दस्योत्कृष्टवाचकत्वेन परत्वादुत्कृष्टत्वाद्बाधकत्वादिति यावत् इत्यर्थो व्याख्यापनेतदानभाष्यविरोधः प
रेतनव्याख्यानं क्लिष्टम् यद्यपि यदि तु ऊनशब्दमाश्रित्येत्यादिभाष्ये गुणस्यांतरंगत्वप्रति पादकेन अंतरंगत्वेन हेतुना नास्य यणादे।

यत्तु कैयटेन नदंतविधीयत्वेपरत्वाद्गुणः प्राप्नोतीत्युक्तम् तत्तु ऊनशब्दमाश्रित्येत्या
दिभाष्यासंगत्याचिंत्यम् ॥ ॥

शबाधकत्वमभ्युपेतं भाष्यकृता कैयटेन तु यथांतरंगत्वेन हेतुना परत्वापेक्षया बलवत्त्वेन तस्य तद्बाधकत्वम् तथा परत्वस्या
पि पूर्वापरस्थितिकत्वेन हेतुत्वसंभवात् परत्वाद्गुणः स्यादित्युक्तम् इति विभाव्यते तदा कैयटोक्तिरपि संगच्छते इति न तद्भाष्य
विरोधः तथापि नित्यांतरंगापवादेषु विप्रतिषेधसूत्राव्यापारात्परत्वादित्युक्तिरयुक्तैव ॥ ॥ ॥

गोधेरः इत्यादौ वहिरंगपरिभाषया इत्यादेशस्यासिद्धत्वाल्लोपो र्वलीति लोपो न स्यादित्याक्षेपे वलि लोपे अंतरंगपरिभाषा न प्रवर्त्त
त इति समाहितं कैश्चित् । तदसत् । गोन इत्यादावपि तल्लोपविषयतायाः सत्वादंतरंगपरिभाषाया अप्रवृत्त्या कैयटोक्तिश्लिष्टत्वे वेति कस्यचि
दुक्तं लोपो व्योर्वलीति सूत्रस्य भाष्यविरोधेन त्वदुक्तमित्यमादा वलिलोप इति वस्तुतस्तु गोधेर इत्यादौ लोपो व्योर्वलीत्यस्यान्तरंगत्वरा
पादेनावहिरंगत्वं तस्मिन्नंतरंगे वलिलोपे प्रवृत्ते रायादीनामसिद्धत्वं प्राप्तं तत्रान्तरंगे वलिलोपे कर्तव्ये वहिरंगपरिभाषा न प्रवर्त्तत
इति समाहितं कैश्चित्तदीत्याप्रवृत्तेन न संभवति अत्र ऊठ्गुणयोरन्तरंगत्वाद्वलिलोपे कर्तव्ये वहिरंगपरिभाषा न प्रवर्त्तत इति स
माहितं कैश्चित्तदप्यात्प्रवृत्तेन संभवति अत्र ऊठ्गुणयोरंतरंगवहिरंगभावपर्यालोचनात्तन्निमित्तकलोपयोर्वान्तरंगवहिरंगभा

वलिलोपेऽन्तरंगपरिभाषा न प्रवर्त्तत इति तु न युक्तम् तत्सूत्रस्य भाष्ये एवं त्वादिषु लोपातिप्रसंगमाशं
कोपदेशसामर्थ्यान्न नवहन्यनीत्यादौ चारितार्थ्यम् वहिरंगतया संप्रसारणस्यासिद्धत्वेन पूर्वमेव तत्प्र
वृत्तेरिति भाष्योक्तेः

वानुपपादनात् तस्माद्गोधेर इत्यादावुक्तसमाधानस्याऽऽवैषम्येन कैयटोक्तेश्चिन्त्यत्व सामान्तसाप्युत्तावपि तु मशक्यत्वात् त
स्य वलिलोपेति सूत्रभाष्यविरोधेन तत्त्वं तत्त्वदुक्तमनुचितं स्यात् तस्मात्स्योन इत्यत्र ऊठ् विषये णिचि अंतरंगे वलिलोपे वहिरंगस्य ऊठो
ऽसिद्धत्वाद्वलोपप्रसक्तौ गोधेर इत्याद्युक्तन्यायेन अंतरंगपरिभाषा न प्रवर्त्तत इति केषांचिद्युक्तं विघटयितुं लोपो व्योर्वलीति
सूत्रस्य भाष्यविरोधेन तत्रोक्तन्यायं खंडयति वलिलोप इत्यादिना तत्र वलिलोप इत्यादिग्रंथोऽवतार्यः लोपो व्योर्वलीमति ।
सूत्रस्य भाष्यं तु मलेपवार्थत उक्तं रूपव्यम् ॥ ॥ ॥ ॥ ॥

प·रि·शे·
टी·
१०३
103

ननु नलोपः सुप्स्वरेति सूत्रे अथ संज्ञाविधौ किमुदाहरणमिति पृष्टे पंचसप्तेति प्रयोजनमुपपाद्य नान्तायां षट्संज्ञायां जश्शसो
र्लुक् नचाकृतेनलुकि पदसंज्ञा पदसंज्ञायां नलोपः प्राप्नोति तदेतदान्तर्पूर्व्यात्सिद्धं भवतीति निराकृत्य इदं तर्हि प्रयोजनं पंचभिः सप्तभिरि
ति षट्त्रिचतुर्भ्यो हलादिः कल्पयोऽन्नमित्येष स्वरो यथा स्यादिति प्रयोजनान्तरमुपपाद्य तन्निराकुर्वता भाष्यकृता सरेवधारणत्वसंज्ञा।
ग्रहणमनर्थकमित्युक्तम् तद्व्याख्यावसरे भाष्याकृतः स्त्रीसमानाधिकरणपक्षस्त्रीसत्त्वेनाश्रितः अपितु प्रकृत्यर्थविशेषणपक्षः

यत्तु नलोपस्य षट्संज्ञायामसिद्धत्वात् पंचेत्यत्र न षड्भ्य इति निषेध इति तन्निंत्यम् नलोपस्य हि पद
त्वसापेक्षत्वेन बहिरंगत्वं वाच्यम् तच्च न संज्ञाकृतबहिरंगस्यानाश्रयणात् पंचेत्यत्र नि
षेधस्तु स्त्रियां प्राप्नोतीति तन्नेति व्याख्यानसामर्थ्येन भूतपूर्वषट्त्वमादायेति बोध्यम् ॥

प्रत्ययार्थविशेषणपक्षो वेति पंचादीनां नामलिंगत्वात् स्त्रीप्रत्ययस्य प्राप्तिर्नास्तीति नार्थस्तन्निषेधेनेत्युक्ता अथापि तत्प्राप्तिः स्यात्तथापि नलो
पस्य बहिरंगत्वादन्तरंगेऽपि असिद्धत्वान्नास्ति टाप्प्राप्तिः सत्यामपि टाप्प्राप्तावन्तरंगापां षट्संज्ञायां नलोपस्यासिद्धत्वात्सिद्ध एव न
त्वनिषेध इति कैयटोक्तमपि पूर्वोक्तचिंत्यतद्धि चिंत्यमित्याह यत्त्वित्यादिना कथं तर्हि पंचेत्यत्र टाप्निषेध इत्यत आह पंचेत्यत्र निषे
धस्त्विति ॥ ॥

१०३
६२

अत एवेति नलोपे कृते संज्ञाकृतबहिरंगस्यानाश्रयणादेवेत्यर्थः नन्वत्र पदस्य भ्यामादिनिमित्तकत्वेन तन्निमित्तकनलोप
त्वात् शङ्कृतनबहिरंगत्वमेवात्र संप्रतिपन्नमिति कृतितुग्ग्रहणस्यैवेयर्थ्यमेवापत्तिनिमित्तत्वादत्र परंपरयेति नमानमिति अत्रेति
शेषः अन्यथा यथाश्रुतेपत्रन्यविभाषाज्ञापकपरभाष्यविरोधः स्यात् तत्रवादऊठितिसंप्रसारणस्य च निमित्तकत्वे परंपरयैव
बहिरंगत्वाश्रयणात् ननु पदप्रतिषिद्धं नापि विहिततदंगो कार्यमेवेति मायेपरंपरया शङ्कनिमित्तक बहिरंगत्वमप्याश्र।

अत एव कृतितुग्ग्रहणं चरितार्थम् वृत्रहभ्यामित्यादौ पदत्वनिमित्तकत्वेपि नलोपस्य बहिरंग
त्वाभावात् भ्यामः पदसंज्ञानिमित्तत्वेपि नलोपस्य तन्निमित्तकत्वाभावात्परंपरयानिमित्तत्वमा
दाय बहिरंगत्वाश्रयणे तु न मानम् ध्वनितं चेदं नलोपः सुप्स्वरेति सूत्रे भाष्ये इति तत्रैव ॥ ❁ ॥

णोपम् कृतितुग्ग्रहणं च प्रत्याख्यातमेव भाष्ये अत एवाह ध्वनितं चेदमिति। नत्वाहितुग्विधौ किमुदाहरणं वृत्रहभ्यां वृत्रहभिः न
लोपः कृते ह्रस्वस्य पिति कृतितुक् प्राप्नोति असिद्धत्वान्न प्राप्नोतीति तुग्विधावित्यस्य प्रयोजनमुपपाद्य तुग्विधौ चोक्तं किमु
क्तं सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति तत्प्रयोजनं निराकुर्वता परंपरया निमित्तत्वमादाय बहिरंगत्वं नास्ती
ति ध्वनितम् यदि तत्स्यात्तेनैव तत्प्रयोजननिराकरणे सन्निपातेत्युक्त्या तन्निराकरणमनर्थकं स्यात् भाष्ये तु तुग्विधौ चोक्तं
मित्यत्र कृन्मेजन्त इति सूत्रे इति शेषः पूरणेपि ॥ ❁ ॥ ❁ ॥ ❁ ॥

प·रि·शे·
टी·
१०७
104

भाष्यप्रदीपोद्योते निरूपितं अस्माभिरिति शेषः ननु हि सन्निपातपरिभाषायास्तु गमावः प्रयोजनत्वेनोक्त इति भाष्यकारस्तथैव व्याचष्टे स
न्निपातेति कैयटः नन्वनर्थेवेति प्रतीकमुपादाय बहिरंगपरिभाषाया अनादरेण सन्निपातपरिभाषाश्रयणेनेत्यर्थः भाष्यकृता तु संज्ञानि
मित्तस्य न बहिरंगत्वं विभक्तिस्तु सत्तानिमित्तं नलोपस्य परंपरया निमित्तत्वमादाय बहिरंगत्वाश्रयणेनेति वस्तुतस्तु क्त्मेजंत इति
सूत्रे भाष्ये सन्निपातेति परिभाषा प्रयोजनान्याख्यानावसरे ग्रामणिकुलमित्यादौ नुगभावप्रयोजनमुपपाद्यैतदस्ति प्रयोजनं बहिरं
गत्वं स्वत्वमंतरंगस्तु कु असिद्धं बहिरंगमंतरंग इत्येतत्प्रयोजने बहिरंगपरिभाषाया पूर्वं निराकृते अनंतरं च नलोपप्रभृत्यह भिः भ्रूण
हूभिरित्यत्र नलोपे कृते ह्रस्वस्यपितिकृति तुग्भवतीति तु कु प्राप्नोति सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न दोषो भवि
तीति पुनस्तस्याप्रयोजनानंतरमुपपाद्य एतदपि नास्ति प्रयोजनं असिद्धो नलोपस्तस्यासिद्धत्वान्न भविष्यतीति असिद्धत्वेन तन्निरा।

भाष्यप्रदीपोद्योते निरूपितम्

कुर्वता भाष्यकृता असिद्धत्वं च स्वर्वप्रक्तं न बहिरंगपरिभाषयैव वाभिमतं नलोपः सुप्स्वरेति तत्रैव न त्वन्यत्तु विधिप्रयोजनस्य निराक
रिष्यमाणत्वात्तत्र सन्निपातपरिभाषायास्तत्प्रयोजननिराकरणं तु असिद्धांतावलंबिनिराकरणोपमित्येवं तत्र भाष्यकृता तात्प
र्यम् न तत्र सन्निपातपरिभाषायामेवाग्रहः सिद्धांतावलंबनं तु निष्करणं बहिरंगपरिभाषयैवेति बोधम् अत एवेन दस्वरसं
मनसि निधायैव क्त्मेजंत इति सूत्रे असिद्धो नलोप इति प्रतीकमुपादाय नलोपः सुप्स्वरेत्यसिद्धमित्युक्ता बहिरंगमिति चेत्याह कै
यटः तस्मात्रेन ज्ञाप्यवलेन परंपरया निमित्तत्वमादाय बहिरंगत्वं नास्तीति कल्पमित्युक्तम्

१-७

इदानींपदार्थंनिरूप्यवाक्यार्थंनिरूपयति अंतरंगइति नन्वेवंलोपोव्योर्वलीतिसूत्रेव्रश्चादिषुचातिप्रसंगोभवती
तिइहापिप्राप्नोतिव्रश्चिनोव्रीहयः व्रणः इतिनाशंकाउपदेशसामर्थ्यात्व्रश्चादिलोपोनभविष्यतीतिसमाधायापत्रस्य
मदुपदेशप्रयोजनंसंप्रसारणहलादिशेषसूत्रेवकारस्यश्रवणंयथास्यात् वृक्णः वृक्णवान् वृश्चतीति
वार्त्तिकार्थोपपादनेनतत्सामर्थ्यविघटनाशंकायांनवावहिरंगलक्षणत्वादितिसमाहितंभाष्यकृतातच्चविरुध्ये

अंतरंगेकर्त्तव्येजातंतत्कालप्राप्तिकंचवहिरंगमसिद्धमित्यर्थः व्रश्चादिषुपदसं ।
स्कारपक्षेसमानकालत्वमेवद्वयोरितिवोध्यम् एतेनअंतरंगवहिरंगाद्वलीपइति
परिभाषांतरमित्यपास्तम्

नजातस्यतत्कालप्राप्तिकस्यचवहिरंगस्याभावात् उपदेशावस्थायामेवतन्यसत्त्वात्सोभयपक्षपत्वासंभवादित्यत
आह व्रश्चादिष्विति एवोक्तवाक्यार्थोपपादनेनैतदुक्तंभवति अनयैवार्थद्वयस्यापिक्रोडीकाराच्चक्वैकदेशाद्यभिमतं
अंतरंगंवहिरंगाद्वलीपइतिवचनांतरकल्पनमफलमितितदेवाह एतेनेति ॥ ॥

प॰ रि॰ शे॰
टी॰
१०५
105

ननुनान्यापरिभाषया अर्थद्वयस्यैकोऽङ्गीकारः संभावयितुं शक्यः अपितु वहिरंगस्यानुसारेणांतरंगे कर्तव्ये जातं वहिरंगमसिद्धंनै
द्मित्येकएवार्थ इत्यतो विप्रतिषेधसूत्रस्य परिभाषांतरप्रत्याख्यानं हेत्वंतरत्वेनाह एतामितिविप्रतिषेधसूत्रेहि अंतरंगंचांमरंगव।
लीयो भवतीति परिभाषांतरस्य प्रयोजनान्युपपाद्य एतान्यस्याः परिभाषायाः प्रयोजनानि यदर्थमेषापरिभाषाकर्तव्यापद्दिसंतिप्रयो।
जनानीत्येषा परिभाषाक्रियते ननु चेयमपिकर्तव्या असिद्धं वहिरंगलक्षणमंतरंगइति किंप्रयोजनं पचावेदं पचमिदं असिद्ध।
स्याद्वहिरंगलक्षणस्य गुणस्यांतरंगमेत्वं माभूदितीत्युक्त्वा उभेनर्हिपरिभाषे कर्तव्ये इतिवादिना एष्टेसिद्धांतिनेत्याह अनयैव

एतामाश्रित्य विप्रतिषेधसूत्रे भाष्येतस्याः प्रत्याख्यानाच्च ॥

सिद्धमितित्युक्तात् पञ्चाम्ख्यारत्याद्यर्थ उकृषो पंप्रान् कृत्यायान्यप्रति शरीरकार्यार्णिना नितावत्करोतितनः स्वहृदांततः संबंधि
नामितिप्रचः परस्मिन्निति सूत्रस्य लोकदृष्टंतिनांतरंगस्यबलीयस्त्वसमर्थनपरं भाष्यंतंवाहऊ ङिति सूत्रस्योन्यहणज्ञापितवहिरं
गपरिभाषासिद्धांतरंगबलीयस्त्वसमर्थनपरंनापूर्ववचनसमर्थनपरमितिनितद्विरोध इतितदाशयः ॥ ॥ ॥

एतस्यपरिभाषाग्रहतौलिंगमाह अंतरंगेतिनचेत्यादिवक्ष्यमाणग्रंथेनकैयटाद्यर्वाचीनसिद्धांतखंडनायतद्धितरूढंस
द्धांतमाह इपंचेति नन्वियंनसपादसप्ताध्यायीस्थातत्वतत्रभावीलक्षिपराहतत्वात् एतःतदृस्यात्रिपाद्याअसिद्धत्वात्तत्रनप्र
वर्तत इत्यतः स्वसिद्धांतसंरक्षणायतस्याःसपादसप्ताध्यायीस्थत्वंसंपादयितुं तत्रज्ञापकमाह असंचेति एवंवाहऊ।
ठितिसूत्रस्यसपादसप्ताध्यायीस्थत्वात्तस्यऊठ्यग्रहणज्ञापितत्वेनेतस्याअपिसपादसप्ताध्यायीस्थत्वंसिध्यति त

अंतरंगशास्त्रीयत्वमस्यालिंगम् इपंचत्रिपाद्यांनप्रवर्ततेत्रिपाद्याअसिद्धत्वात् असंचवाहऊठिति।
सूत्रस्यसूठ्यग्रहणंज्ञापकमित्येषासपादसप्ताध्यायीस्था अन्यथासंप्रसारणमात्रविधानेनलघूप
धगुणोवृद्धिरेचीतिवृद्धौविशेषोह इत्यादिसिद्धौतेद्वैयर्थ्यंस्पष्टमेव सत्यांतस्याबहिरंगस्यसंप्रसारणस्या
सिद्धत्वाल्लघूपधगुणोनस्यात् नचप्रगंतेतिसूत्रेनेमित्तसिकोविशेषणं अतएवभिनत्तीत्यादौन
गुणः ॥ ॥

दे वदर्शयति इत्येषेति इदानींविपदेवाचकत्वंदर्शयति अन्यथेति ननुप्रगंतेतिसूत्रे इकोगुणेतिपरिभाषोपस्थित।
इकः वस्तुतःकार्यित्वेनश्राधान्यात्तद्धि शेषणत्वमेवनिमित्तस्यसंभवति तथासतिगुणस्याजानन्तर्य्यकार्यित्वस्यस
त्वात्प्रकृतेनाजानंतर्येनिपरिभाषयानिषेधेज्ञापिते पिस्त्वांशेचारितार्थ्याभाव इत्याशयेनाशंकिते नचेति ॥
॥ ॥ ॥ ॥ ॥

परिहरति अत्ययस्येति प्रकृतिनिमित्तभूतस्येत्यर्थः नचैवं पुगंतेत्यस्य पुगंतलघूपधांगस्य सार्वधातुकार्धधातुकपरकस्य गुणादेशो भवतिसान्विकअर्थसंभवेभिन्नतीत्यादौगुणोदुर्वारः नत्रनिखिलपूर्वोक्तार्थस्यसमन्वयात् इकोनिमित्तविशेषणत्वेनसार्वधातुकार्धधातुकपरर स्य इको गुणादेशो भवति सचेत् पुगंतलघूपधांगस्यावयवइत्यर्थेयेननाव्यवधानमितिन्यायेनसेधतीत्यादावुपधासंपादकवर्णमात्रव्यवधानेनत्प्रवृत्तावपिभिनत्तीत्यादौतदधिकव्यवधानेप्रवृत्तौमानाभावान्नदोष इत्यतः हेत्वंतरमाह पुगंतेत्या

एवंचनाजानंतर्यमितिनिषेधात्कथंपरिभाषाप्रवृत्तिरितिवाच्यम् प्रात्ययस्यांगांशाउस्थिता।
कांतत्वेनतत्रैवान्वयात् पुगंतेत्यादिकमेधारयाश्रयणेनप्रत्ययपरांगावयवलघूपधा
रूपेकोगुणइतिइकोगुणवृद्धीतिसूत्रेभाष्यसंमतेर्थेभिनत्तीत्यादावदोषाच्च अकारांतेचो
पसर्गेःनकारांतेचोपसर्गेवहेर्वाग्विविचोअनभिधानान्नलपव ॥ ॥

दीति ननुप्रन्यायाकारांतउपसर्गेत्विविइत्याद्यनकारांतेचोपसर्गेवहेर्वाग्विविचोःसनोःसनम्छिप्रोहोव्यूहइत्यादिसिद्धिः असा
न्ति नलस्मिन्पुगंगमेतिगुणेप्रोहः व्योह इत्यनिष्टंस्यात् तस्मादिष्टसंपादनेनानिष्टवारणे नचउभयप्रदिनार्थत्वेनतस्यज्ञापकस्या
संभवः स्यादित्याशंकांपरिहर्तुमाह अकारांतेचेतिज्ञापकपरभाष्यप्रामा
एयादितिरिभावः ॥ ॥

ननु तदनभिधानेपि वार्णाद्धेत्यादीनां तदभावात् तदर्थं सूत्रग्रहणमावश्यकमेवेत्यत आह वार्णाद्दृ इति नन्वेवमर्थासंगतिरित्यत
आह। धातूनामिति। नन्वेवमपि शेहेत्यादीनामप्येवमेव सिद्धिः कुतो नेत्यत आह। श्रोहेत्यादीनामेतिनन्वेवमपि पत्वटत्वस्य इति ऊठो भावा
हृद्धेरप्रभावपि अत्र प्रादृहेतिवृद्धिर्दुर्वारेवेत्याह असेति ननु त्रिपाद्यामियं न प्रवर्तते इत्युक्तम् तत्किं यथोद्देशपक्षे कार्यकालपक्षे वा। नाद्यः
तत्र तन्मूलत्वभावस्य सर्वसंमतत्वात् न द्वितीयः तत्र तत्तत्कार्यविधायकैः त्रिपादिस्थैः स्वप्रतिलिंगचिह्नितपरिभाषाणामात्तेवणता
संत्रिपाद्यामपि रभ्युपगमात् अत एव ऊ.मोहृस्वादचीत्यादौ त्रिपादिस्थपरत्वात्तस्यादित्युत्तरस्येत्येतेन न उभयत्र निर्देशे पंचमीनिर्देशो
वलीयानिति सूत्रस्य भाष्योक्तमवस्थासंगच्छते तस्मात् तत्र तन्मूलत्वभावाय यथोद्देशपक्ष एवाश्रयणीयः कार्यकालपक्षे तु तत्र तन्मूह

वार्णाद्द इत्यादि तऊहृतेः किंपिवोध्यम् धातूनामनेकार्थत्वान्नार्थासंगतिः श्रोहइत्याद्यसाध्वेवहृद्धेरमाप्तेः
असेहस्यानर्थक्यात् प्राद्वहोढोत्यस्यापि प्रवृत्तिः न च कार्यकालपक्षे त्रिपाद्यां तत्प्रवृत्तिर्दुर्वारेति वाच्यम्
पूर्वत्रेति परस्यासिद्धत्वादन्तरंगाभावेन पूर्वस्य तन्निरूपितबहिरंगत्वाभावात्तस्यासिद्धत्वप्रतिपादनासं

निरस्येवेति केचित्सिद्धांतं तन्न चेत्यादिना शंकयति किं कार्यकालपक्षे परिभाषाविशेषस्य त्रिपाद्यां प्रवृत्तिरुपपद्यते उत तत्सामान्य
स्य नाद्यः तस्याभ्युपगमपराहतत्वात् न द्वितीयः इमाशयेन परिहरति पूर्वत्रेतीति तथा च सामान्यतः पातित्वादंतरंगपरिभा
षा त्रिपाद्यां न प्रवर्तते इति वाच्यम् तथा सत्यसिद्धत्वं प्रतिपाद्यते न तु किं पूर्वस्मिन्नंतरंगे त्रिपादीस्थे कर्तव्ये परं यद्बहिरंगं तस्य प्रतिपा
द्यते उत परस्मिन् त्रिपादिस्थेंतरंगे कर्तव्ये पूर्वं यत्सपादसप्ताध्यायीस्थं त्रिपादिस्थं वा तस्य नाद्यः तत्र पूर्वत्रासिद्धमिति सूत्रेणैव
हसिद्धावेतत्परिभाषामहत्त्वे वैफल्यात् न द्वितीयः तत्रापि पूर्वत्रासिद्धमिति सूत्रेण पूर्वं बहिरंगदृष्ट्या परांतरंगस्यासिद्धत्वेन तत्
निरूपितपूर्वस्य बहिरंगत्वाभावेन तयात् स्यासिद्धत्वप्रतिपादनस्यासंभवात् ॥ ॥ ॥ ॥

प॰शे॰

१८

~~108~~ 107

नचैवं पूर्वत्रासिद्धमित्येतस्य प्रवृत्तेः प्रागेवैतस्य परिभाषया परं प्रति पूर्वस्यासिद्धत्वप्रतिपादनेन तन्निरूपितपूर्वत्वाभावात्पूर्वत्रे।
त्यनेनासिद्धत्वप्रतिपादनमयुक्तमित्याशंकते नचेति परिभाषायायापरं प्रति पूर्वस्यासिद्धत्वप्रतिपादनेन तन्निरूपितपूर्व
त्वाभावात्पूर्वत्रेत्यस्य च संबंधः न पूर्वत्रेत्यनेन पूर्वं प्रति परस्यांतरंगस्यासिद्धत्वप्रतिपादनेन तन्निरूपितवहिरंगत्वाभावा
दंतरंगपरिभाषाया उत्सर्गविनिगमनाविरहः प्रागेव तस्मिन्नुभयोरप्रतिपत्तिरिति परिहरति एवं तर्हीति ननु यथा
सम्प्रतिपत्तेः स्थले परस्परप्रतिवध्यप्रतिवंधकाभावादुभयहेतुकानुमितिर्न भवति तथापि तथात्वादुभयोरप्रवृत्तिरितिवा।

नचानयोः पूर्वस्यासिद्धत्वादभावेन तं प्रति परासिद्धत्वं पूर्वत्रेत्यनेन वक्तुमशक्यमिति वाच्यम् एवं हि वि
निगमनाविरहादुभयोरप्यप्रवृत्त्यापत्तेः किंच पूर्वत्रेत्यस्य प्रत्यक्षत्वेन तेनानुमानिकाया अस्या वाध एवोचि
तः अतः कार्यकालपक्षेपि त्रिपाद्यामस्या अनुपस्थितिरेव ॥ ॥

च्यम् तत्रयुक्तम् सम्प्रतिपत्ते उभयोर्हेत्वोस्तुल्यवलत्वेन परस्परं तथात्वादुभयोर्हेतुकानुमित्यभावेपि प्रकृते आनु
मानिकांतरंगपरिभाषापेक्षया प्रत्यक्षसिद्ध पूर्वत्रेत्यस्य वलवत्त्वेनोभयोस्तुल्यवत्त्ववत्त्वेन तथापादनस्य दुर्घटत्वादि
त्यत इष्टापत्त्या परिहरन्नाह किंचेति उपसंहरति अत इति ॥ ॥ ॥

नन्वेवमवसानकोपोरिति सूत्रे भाष्ये विसर्जनीयोऽनुत्तरपदे। विसर्जनीयः अनुत्तरपद इति वक्तव्यं इह मा भूत् वार्कुटः नापि।
त्य इति वचनकर्तव्यानामापाद्यत नहि वक्तव्यं विसर्जनीयोऽनुत्तरपद इति नवा वहिरंगलक्षणत्वात् वहिरंगो रेफः अन्तरंगो विस
र्जनीयः असिद्धं वहिरंगमन्तरंगे इत्युक्तत्रिपाद्यामप्यन्तरंगपरिभाषासंचारस्य स्पष्टमुक्तत्वेन अन्यत्वसिद्धस्यापि शास्त्रस्य वलवद्
वचनं विरहसंहक्तनलक्ष्यसिध्युद्भावकत्वेन वलवत्वांदानुमानिकार्थान्तरंगपरिभाषायावधइत्यभिमतं भाष्यकृतानाम् अन्य
थात्रिपाद्यां परिभाषासंचारपरं भाष्यमयुक्तं स्यात् स्यादितज्ञाप्यविरोधात्रिपाद्यामस्या अनुपस्थितिरेव– युक्तमिति चेन्मै
वम् पूर्वपक्षितया तथोक्तत्वेन तस्य तथाभिमतत्वेऽपि सिद्धान्तिनाऽनुमानिकयेत्तपाद्यत्वसिद्धस्य शास्त्रस्य वलवत्वेनानेनत

प्रतपवकार्यकालपक्षमेवोक्तस्योक्तयुक्तिमक्तानोयुक्तोपंपरिहारो नवा वहिरंगलक्षणत्वादिती
युक्तम्

स्यावाधे कार्यकालपक्षमेवोपक्रम्य कुतो नखल्वेनत् द्वयोः परिभाषयोः सावकाशयोः समवस्थितयोः पूर्वत्रासिद्धमिति अ
सिद्धं वहिरंगमन्तरंग इति च पूर्वत्रासिद्धमित्येतामुपमर्द्य असिद्धं वहिरंगमन्तरंग इत्येतया अपस्याभविष्यति न पुनरसिद्धं वहिरंगमं
तरंग इत्येतामुपमर्द्य पूर्वत्रासिद्धमित्येतया व्यवस्थास्यात् अतः किं अतो युक्तः परिहार इत्युक्तेन तथानभिमतत्वात् तस्मादेतन्सि
द्धान्तभाष्यप्रामाण्यात् पदद्वयेऽपि त्रिपाद्यामेव तदनुपस्थितिरेव अन्यथानदयुक्तं स्यादित्याह अनपवोति उभयत्राप्येत
दनुपस्थितिरेवेत्यर्थः ॥ ॥

प॰शे॰
१०८
108

वचनमिति विसर्जनीयोऽनन्तरपदे इत्याकारकमित्यर्थः वचनार्थस्तु उत्तरपदे सति यो रेफो निष्पन्नः तन्निमित्तकस्य विस
र्जनीयो न भवतीति तेन दास्याः पुत्रादौ भवत्येव नह्यत्र सकाररेफ उत्तरपदनिमित्तकः किंतर्हि पदत्वनिमित्तकः नार्कूटः
इत्यादौ तु नहि तन्निमित्तत्वेपि रेफस्य उत्तरपदनिमित्तत्वादकारस्यादित्वस्योत्तरपदं निमित्तमस्त्येव स्पष्टश्चायमर्थस्तत्रै
कैयटे न पदान्तसूत्रस्य न दोष इति लत्वार्थवचनारंभोप्यत्र प्रमाणमित्याह अत एवेति पक्षद्वयेपि त्रिपाद्यामेतदसंचा
रादेवेत्यर्थः स्यादेतत् शिष्टाकोपे विरुद्धमिति चेन्न शास्त्रपरिमाणत्वादित्यधिकरणीयप्रमाणबलात् प्रमेय ॥

विसर्जनीयसूत्रे भाष्ये सिद्धान्तिना त्रिपादिस्थेंतरंगे कर्तव्येयं परिहारो नयुक्त इति तदर्थः किंतु व
चनमेवारब्धमिति तदाशयः अत एव निगाल्यते इत्यादौ लत्वार्थं तस्य दोष इति वचनमेवारब्धव्यमन्य
थान्तरंगत्वात् णिलोपात्पूर्वं वैकल्पिकलत्वेनेष्टे पर्यायस्य इष्टमेवायेपि लत्वानुरोधादानुमानिकार्थं अंत
रंगपरिभाषया असत्त्वसिद्धं पूर्वत्रेत्यस्य बाधं वदन्तीति तेपि लक्षणैकचक्षुर्भिर्नादरणीय इति दिक् ॥ ॥

बलाबलस्य न्यायत्वमिति न्यायेन स्वतिसजातीय आनुमानिकपरिभाषापेक्षया श्रुति सतोपमसत्त्वासिद्धं पूर्वत्रासि
द्धमिति शास्त्रस्य बलवत्वेपि यथा वेदं कृत्वा वेदिं करोतीति श्रुत्यपेक्षया बलवत्प्रमेयआचमानादिपदार्थाश्रितत्वेन आ
चान्तेन कर्तव्यमित्यादि स्मृतेर्दौर्बल्यं तथा बलवत्प्रमेयलक्ष्याश्रितत्वेन प्रत्यक्षसिद्धशास्त्रापेक्षया आनुमानिक्या अपि
परिभाषाया बलीयस्त्वमिति लक्ष्यानुरोधात्कार्यकालपक्षे परिभाषायास्त्रिपाद्यामप्रवृत्तिमाश्रयन्तीत्येके चित्कैयटादयस्तु

परिभाषावृत्तिः
१०८

वस्तुनस्तु कुतो न खल्वेतदित्यादि उत्तरभाष्यानुरोधेन नार्कुं दध्यादौ विसर्गवारणाय वार्तिककारेणारब्धविसर्जनीयोत्तरपदे इति
वार्तिकप्रत्याख्यानपरं नभावावहिरंगलक्षणत्वादित्यारभ्य एवमेवासिद्धा भवतीत्यंतं नैकदेशीति कल्पयितुं युक्तम् अपि तु कुतो न ख
ल्वेतदित्याद्युक्तानुक्तकथनेन मुख्यत्वादेतस्यैवैकदेशयुक्तित्वप्रतीपत्ते अथवा समासेनजू पूर्वे कोल्पविति सूत्रस्य प्रत्यपेक्षन ग्र
हणाक्रमग्रहणः विषयभाष्यवदत्रापि कार्यकालपक्षेत्वरवसानयोरिति सूत्रेकवाक्यतया पूर्वत्रासिद्धमित्येतदपेक्षया परत्वा
द्धि प्रतिषेधे परमितिव्यवस्था नच पूर्वत्रासिद्धे नास्ति विप्रतिषेधे इति वाच्यम् पूर्वत्रासिद्धमित्यनेन स्वेन रपूर्वापेक्षया पर
स्यासिद्धत्वप्रतिपादनेपि स्वापेक्षया परस्य पूर्वापेक्षया स्वस्यासिद्धत्वमप्रतिपादने आत्माश्रयात् मानाभावाच्चान्त्यो सप्रयत्नस
वर्णमित्यादौ तु लोकसिद्धस्वघटकपदार्थबोधमात्रेणावाकार्थबुद्धेनस्सापेक्षा नेह नानास्ति किंचनेत्यत्र च सर्वमित्यास्याप्रति
पादनान्यथानुपपत्त्यास्वात्ममिथ्यात्वप्रतिपादनेपि न दोषः अन्यथास्वातिरिक्तत्वेन श्रुतिः संकोचे च प्रमाणाभावः नैवं तथा
विधान्यथानुपपत्तिरत्रास्ति किंच श्रुत्यनुग्राहकतर्कस्यतेन हेतुना मिथ्यात्वं साधयतो दृश्यत्वाविशेषात् श्रुतेरपि मिथ्यात्वेबा
धकाभावान्न किंचिदत्र वक्तव्यमस्ति इमामेव परत्वाख्यवस्थां मनसि निधाय कुतो न खल्वेतदित्युक्ता अतः किमिति रुष्टे।
अतः युक्तः परिहारो न वावहिरंगलक्षणत्वादित्युक्तम् अत इत्यस्य परत्वादित्यर्थः अयुक्त इति पदद्वेष्टस्तु प्रमाणाभावव्या
हतः प्रत्यक्षशास्त्रस्य आनुमानिकवचनेन न व्याप्य इति तु न युक्तम् नहि प्रत्यक्षसिद्धस्य शास्त्रेण बाधे सूत्रनवचनेनै
वोपपत्तेः औदुंबरीन्यायेन तत्परित्यज्य वचनांतरकल्पनमपि वाच्यं शिष्यकोपे विरुद्धमिति न्यायेनानुमानिकवचन
स्य बलवत्सहकारितया औदुंबरीन्यायानवतारात् प्रत्यक्षसिद्धस्याप्यनुमानिकेन वचनेन बाधस्य न्याप्यत्वात् स्पष्टश्चा
यं न्यायः प्रथमाध्यायस्य तृतीयपादे पूर्वमीमांसायाम् तत्र हि आचान्तेन कर्तव्यमित्यादिस्मृत्या आचमनादयः पदा
र्थाः वेदं कृत्वा वेदिं करोतीत्यादिश्रुत्युक्तक्रमादिभिर्वाध्यं नेनवेति विचारे प्रसक्ते प्रमाणबलाबलविचारे क्रियमाणे

प॰शे॰
१०९
109

श्रुतिरूपस्यप्रमाणस्यनिरपेक्षत्वेनसापेक्षस्मृत्यपेक्षयावलवत्त्वेनश्रुत्युक्तक्रमादिभिःस्मृत्युक्ताचमनादेर्बाधोवा
ध्यंतएवेतिप्राप्तेप्रमाणवलात्प्रमेयवलस्याज्यायस्त्वात्प्रमेयवलावलविचारेस्मृत्युक्ताचमनादीनांप्रमेयाणांस्वयंपदा
र्थभूतत्वात् पदार्थधर्मभूतश्रुत्युक्तक्रमाद्यपेक्षयावलवत्त्वेनसापेक्षतायाअपिस्मृतेर्बलवत्प्रमेयभूतपदार्थाश्रितत्वेनव
लवत्त्वान्निरपेक्षताया अपिश्रुतेश्चदुर्बलपदार्थधर्मक्रमाद्याश्रितत्वेनदुर्बलत्वान्नतदुक्ताचमनादीनांश्रुत्युक्तक्रमादि
भिर्बाधः अपितुस्मृत्युक्ताचमनादिभिरेवतदुक्तक्रमादीनांबाधइतिसिद्धान्तः शिष्टकोपइतित्वधिकरणपूर्वपक्षसू
त्रम् तदर्थस्तुशिष्टायाःश्रुतेःअकोपेविरोधेअविरुद्धंस्मृत्युक्ताचमनादिकंकर्तव्यमितिचेन्न शास्त्रपरिमाण
त्वात्क्रमस्यशास्त्रपरिच्छिन्नत्वात् तथासतिशास्त्रपरिच्छिन्नंहिक्रमंआचमनादयोवाधेरन्नितियावत् एवंचप्रकृतेपि
अपूर्ववचनविरहसहकृतवलवत्त्वाश्रितत्वेनानुमानिकस्यापिवचनस्यपूर्ववचनसहकृतदुर्बलत्वाश्रितप्रत्यक्ष
सिद्धशास्त्रापेक्षयावलवत्त्वंबोध्यम् एवंनिसंयोगान्तस्यत्रस्थंवहिरंगलक्षणाद्धितिवार्तिकम् तद्भाष्यंचसंगच्छते
रदाभ्यांनिष्ठेतिसूत्रेवृद्धिनिमित्तात्प्रतिषेधइतिवार्तिकस्यकार्तिः इत्यादिसिद्ध्यर्थंनवावहिरंगलक्षणत्वादितिभा
ष्यम् मातुपयायाश्चेतिसूत्रेन्दमनोपत्यंनार्मनइत्यत्रवत्वव्यावृत्त्यर्थंनार्मने प्रतिषेधइतिवार्तिकप्रत्याख्यानायना
र्मनेप्युक्तंनवावहिरंगलक्षणत्वादितिभाष्यम् अट्कुप्वाङितिसूत्रेऽकारात्पर्थंनार्मनेरस्यनकारस्यणत्वार्थंत्वभा
दिषुन्टनमनशब्दपाठोज्ञापकइत्युक्तं अनंतरंनार्मनिनिरित्यत्रविध्यर्थंतत्पाठस्यचारितार्थ्याशंकायांवहिरंगावृद्धिः
अन्तरंगेणत्वंअसिद्धंवहिरंगमन्तरंगेइत्युत्तरभाष्यंच अन्यथापतद्भाष्यचनष्टपमप्पयुक्तंस्यादित्यर्थलपत्नवितेन।

१०९

दपं चेत्पारभ्यादिगित्येतेन ग्रंथेन केपटाद्युक्तिं खंडयन्नं स्वसिद्धांतमुक्तो दानीं प्रकृतपरिभाषायाः ज्ञानं तत्कालप्राप्तिकं चेत्पर्यद्वयं प्र
कृतं न ज्ञायर्थस्य ज्ञापकम् न्यनुसारेण सिद्धावपि द्वितीयार्थस्य निर्मूलत्वेन अप्रामाणिकत्वमित्याशंकावारणाह अत एवेति न
त्वल प्राप्तिकं चेति द्वितीयार्थांगीकारे द्वे न स्थि अत्र त्याङ् ग्रहणसामर्थ्यादेव तत्काल प्राप्तिकं चेति द्वितीयार्थो व्युत्पमाद्युपेयः अन्य
थाथात् उपसर्गसंबंधकार्यत्वेन गुणस्यांतरंगत्वेपि प्रकृतपरिभाषाषाः अप्रवृत्त्या वृद्धा आकुच्छ इत्यादौ परत्वदीर्घे गुणे च वृद्धे कुछ इत्या
दीनां सिद्धावाङ् ग्रहणं व्यर्थं स्यादिति भावः नन्वाङ् ग्रहणं व्यर्थं स्यादिति भावः नन्वाङ् ग्रहणं स्वप्रकृतार्थज्ञापकत्वम् अप्रामाणिकं कु
त्राप्यदृष्टत्वादित्यत आह संप्रसारणाच्चेतीति धर्मिकल्पनापेक्षया धर्मकल्पनाज्यायस्त्वान्नन्द्राष्ट्यवचनांतरज्ञापकप

अत एवोमाङोश्चेत्यत्राङ् ग्रहणं चरितार्थम् नापि वृद्धा आऊढेत्यत्र परमपि सवर्णदीर्घं बाधित्वांतरंगत्वा
द्गुणेकृते वृद्धिप्राप्तौ परत्वपार्थसाधनबोधक प्रत्ययोत्पन्नंतरं पूर्वं धातोरुपसर्गयोग पश्चात्वद्धाश्चा ।
दस्य समुदायेन योगाद्गुणस्यांतरंगत्वमिति संप्रसारणाच्चेति सूत्रे भाष्ये स्पष्टम् ॥ ॥

रमिति तदीशपः तद्भुन रस्वारस्याद्वचनांतरं ज्ञापकरमेव न दित्यपरे अपं तेषामाशयः संप्रसारणाच्चेति सूत्रे भा
ष्ये आडिः परत्वपवचनं तु ज्ञापकमंतरंगवलीयस्त्वस्य एतज्ज्ञापयत्याचार्योंतरंगंवलीयो भगवतीत्युक्तम् न हि सेतद्भा
ष्यात्तरस्यानदर्थज्ञापकत्वाप्रतीतिः अपितु वचनांतरमेव ज्ञापितमिति प्रतीयते अत एव किमनेन स्यज्ञापनेप्रयोजन
मिति पृष्टे अग्निं अत्र वायू अत्र इत्यादो अग्निप्रो अत्रेति वाक्यसंस्कारपक्षे यणवादेशौ ॥ ॥

प॰ प्रो॰

११०

110

वाधित्वांतरंगत्वात्पूर्वसवर्णदीर्घ इत्यादीनि प्रयोजनान्युपपाद्य तानि विप्रतिषेधेन निराकृत्य अनंतरं इदं नहि
प्रयोजनं उक्ता अत्र लत्ता अत्र पूर्वसवर्णाभ्यो निवहिरंगलक्षणं सवर्णविकारः अतो रो रप्लुताद्प्लुत इत्युक्तम् पूर्वसवर्णो भवत्यं
तरंगत्वमित्युक्तं न चावश्यमेवं प्रयोजनं आद्ययोगे बहूनि प्रयोजनानि संति यदर्थमेषा परिभाषा कर्तव्या इत्युक्तिः संगच्छते अन्य
थानत्क्षापितस्य परिभाषात्वेन व्यवहारस्यासंगत्यापत्तेः नापि वाह ऊठिति सूत्रज्ञापितेवानेनज्ञाप्यते ज्ञापकांतरवैयर्थ्यापत्तेः तस्मा
त्संप्रसारणाच्चेति सूत्रभाष्यस्य प्रकृतार्थज्ञापकत्वासंभवात्संप्रसारणाच्चेति सूत्रे भाष्ये स्पष्टमित्युक्तिरयुक्ताः तद्भाष्यस्य प्रकृ
तार्थज्ञापकत्वासंभवानुकूलत्वादिति स्यादेतत् ननु विप्रतिषेधस्य उभेतर्हि कर्तव्यमेनेत्याह अनयैव सिद्धमिहापि स्योने।
ति असिद्धत्वाद्बहिरंगलक्षणस्य अंतरंगे यणादेशो भवतीति वचनांतरप्रत्याख्यानपभाष्यानुरोधेन संप्रसारणाच्चेति सूत्र
स्थभाष्ये नवचनांतरपरत्वपाव्याख्येयम् अपितु कृत्स्नवचनपरतयैव अन्यथा अंतरंगवलीयस्त्वमना इत्यस्य बहिरंगासि
द्धत्वे नैव वार्तिकोक्तप्रयोजनानां निर्वाहकरणं भाष्यकृतामनुपपन्नं स्यात् न चैवं ज्ञापकांतरोपवर्णनवैयर्थ्यमिति वा
च्यम् ऊठ्ग्रहणज्ञापितवचनस्यात्र सत्तापकत्वमस्यानुसारेणानवहिरंगस्थलेपव प्रवर्तत इति भ्रमनिवारणाय।
ज्ञापकांतरोपवर्णनस्य सार्थक्यादिति चेन्न बहुप्रमाणविरोधादुभे तर्हि कर्तव्ये इति विप्रतिषेधसू- स्थांतरंगवलीयस्त्वनि
राकरणपरभाष्यकारवचनस्य वार्तिककारोपन्यस्तांतरंगवलीयस्त्वेन सकलप्रयोजननिर्वाहाभावाद् ऊठ्विधानज्ञापितस्यो
पन्यस्तपरिभाषा आवश्यापणीयत्वोपन्यासतया वार्तिककारोक्तस्योनादि सकलप्रयोजननिर्वाहयोग्यताशालित्वमा
त्रपरमिति स्वत्प्रर्थत्वेन नेतव्यत्वात् न च प्रथमश्रुतविप्रतिषेधसूत्रस्य भाष्ये वेदोवाद्यापदर्शनादित्यधिकरणोक्त असंजा-

॥ तविरोधिन्यायेन वरमस्तु ॥ ॥

१०१

श्रुतसंप्रसारणाश्चेतिसूत्रस्थाभाष्यापेक्षयाप्रबलत्वात्तदनुरोधेनतदन्यथानेतुंयुक्तमितिवाच्यम् बहुप्रमाण
विरोधात् प्रथमश्रुतस्यापितस्यचरमश्रुतानुसारेणान्यथानेतुंयुक्तत्वात् असंजातविरोधित्वापसत्त्वेनप्रकृ।
तानुगुण्यः नस्वत्रस्रगादिपदानांसन्निहितंप्रथमोपस्थितत्वेवेदपदार्थाविरोधेनैकवाक्यत्वप्रतीतिरदेकवाक्य
त्वप्रतीतिरनेनप्रकरणव्यवधानात् तथासतियथात्रैतेनन्यायेनएकवाक्यत्वभंगापत्त्यास्वार्थोल्लंघनंन
थात्रैतेनन्यायेननस्वार्थोल्लंघनंसंभवति प्रवात्रानेकप्रकरणव्यवहितयोनयोरेकार्थत्वेनैकवाक्यतासंभवतिअ
र्थैकत्वादेकवाक्यमितिन्यायात् अतएवङ्याप्प्रातिपदिकादितिसूत्रेभाष्येकथंपुनरिहोच्यमानाःस्वादयःएकत्वा
दिष्वर्थेषुशक्याविज्ञातुं इत्याक्षिप्य एकवाक्यत्वात् एकवाक्यंतच्चेदंचेतिपरिहृत्यअनंतरंचयद्येकंवाक्यंतच्चे
दंचकिमर्थंनानादेशस्थंक्रियते इत्याक्षिप्यकौशलमात्रमेतदाचार्योदर्शयति यदेकंवाक्यंनानादेशस्थंकरोति
तिपरिहृतंभाष्यकृता तथाचानेनभाष्येणअनेकप्रकरणव्यवहितानामत्वकर्मणिद्वितीयेत्यादीनांस्वादिवि
धायकवाक्येनैकवाक्यतासमर्थनंसंगच्छतेभाष्यकृतामितिवाच्यम् एवमपिउभेतर्हिकर्तव्येनेत्याहेत्यादी
प्रथमश्रुतवाक्यस्यावश्यमेषापरिभाषाकर्तव्येतिचरमश्रुतस्यचषोडशोग्रहणाग्रहणकृत् भावाभावप्रतिपा
दकत्वेनसर्वथैवविरोधादेकवाक्यतयाः असंभवादित्यलंविस्तरेण विस्तरस्त्वन्यत्रद्रष्टव्यः प्रकृतमनुस

॥ ॥ ॥

ननुअन्यत्रस्थितस्यपहीत्यस्यअनुकरणेशिवइत्यानेनसंबंधेनङटकस्यषष्टीसमासेसंबोधनप्रयोगेवाशिवप
हीत्यादौप्रकृतिवदनुकरणंभवतीत्यनवद्भावेनाङ्.त्वमादाय ङेमाङोस्त्रेतिपरत्वपार्थमाङ.ग्रहणंचरितार्थम् त
त्रथात्त्वपसर्गनिमित्तैककार्य्याभावेनांतरंगपरिभाषायाअसंचारादित्यतआह पहीत्यनुकरणस्येति पही
त्येवंयत्यस्यैकमनुकरणंतस्येत्यर्थः नचैवंहि इत्यस्यानुकरणंव्यर्थम् तिङंतावयवस्यपइत्येतस्य इदमनुकरणमि।

पहीत्यनुकरणस्यशिवादिशब्दसंबंधेनतस्यप्रवृत्तिः ज्ञापकपरसंप्रसारणाद्वेतिसूत्रस्यभाष्यप्रा
मारोपनानित्यंप्रकृतिवदनुकरणमित्यतिनिदेशमादायलब्धाङ्.त्वेपतदप्रवृत्तेः ॥ ॥

तिबोधनापतस्यसार्थ्यकात् अत्रकेचित् पहीतिसमुदितमनुकरणमित्यादाआङ.त्वस्यतत्रैकदेशानिष्ट
त्वेपिसमुदायानिष्टत्वेनप्रकृत्यधर्मत्वात् परत्वपस्याङ.मात्राकार्य्यत्वाच्चात्रातिदेशस्यैवासंभवः तथासति।
ति पहीत्यनुकरणस्येत्यादिग्रंथस्तुप्राचामनुरोधेनेति बोध्यम् इत्याहुः अनुकार्य्यफलाभावेनाङ्.त्वस्यतत्रा
तिदेष्टुमशक्यत्वेनासंगतोयंग्रंथ इत्यपिकेचित् स्यादेतत् ॥ ॥ ॥

ननेवमपिनकालप्राप्तिकं चेत्यर्थे आङः ग्रहणासञ्ज्ञापकत्वं न संभवति सदृकान्तर्वे इतिसूत्रस्यभाष्यविरोधा ।
तत्रहि पदद्वयाश्रितत्वेनसंघटोवहिरंगत्वमादायतस्यासि—त्वात्संचस्करनुसंचस्करुरित्यत्रगुणेनस्यात्समच
स्कदित्यत्र चदीर्घोलघोरितिदीर्घः स्यादतस्तन्निवृत्त्यर्थं उपदेशिवद्भावश्चवक्तव्यः इत्यायायगुणार्थेननावत्रा
र्थः वक्ष्यत्येनतन्तं

पत्तु पूर्वं धातुरुपसर्गेणयुज्यते ततः साधनेन उपसर्गेणतत्संज्ञकशब्देनसाधनेनकारकेणतन्म युक्त
कार्येण अतएवात्रभूयतेइत्यादौसकर्मकत्वात्कर्मणिलका—सिद्धिरितितन्न क्रियायाः साध्यत्वेनवोधा
त्साध्यस्यचसाधनाकांक्षतयातत्संबंधोतर—वनिस्तितक्रियावोधेनसाधनकार्यप्रवृत्तपुनरयमेवक्रि
यायोगनिमित्तोपस—संज्ञकस्यसंबंधोचित्यात् अतएवसदृकास्वं इतिसूत्रे पूर्वं धातुरुपसर्गे ।
णयुज्यते इत्युक्तामैनत्सारमापूर्वं धातुः साधनेनयुज्यतेपश्चाउपसर्गेणयुक्तयुक्ता अस्येवयुक्तत्वम्
क्तम् साधनंहिक्रियांनिवर्तयतीत्यादिना उपसर्गेयोत्पार्थान्तरभावेणधातुनैवार्थाभिधानादकर्मकत्वक
र्मणिलकारा—सिद्धिः पश्चाच्छोत्ववोधनायद्योतकोपसर्गसंबंधः ॥ ॥

योगाद्दीर्घगुणविधानेन संयोगोपधग्रहणंक्त—र्थेचडिः दीर्घप्रतिषेधार्थेनापिनार्थः वदमित्तीपंभगवतः क्वत्रिभा
॥ संज्ञा ॥ ॥ ॥

प॰ शे॰

११२

112

युक्तमिह द्रष्टव्यं किमंतरंगं किंच बहिरंगम् धातूपसर्गयोर्यत्कार्यं तदंतरंगं कुतः एतत् पूर्वं धातुरुपसर्गेण युज्यते पश्चात्

साधनेनेतीति उपदेशिवद्भावस्य प्रयोजनद्वयं निराकृतं पूर्वं प्रयोजननिराकरणपरं भाष्यवचनसामर्थ्याद्बहिरंगा

सिद्धस्य बाधः इत्याशयः उत्तरप्रयोजननिराकरणपरस्य त्वयमाशयः धातूपसर्गसंबंधस्यांतरंगत्वेन अनुत्प

न्नैषेव ङः तु धातूपसर्गसंबंधे सड़ाभवितव्यमिति तस्य पदद्वयाश्रितत्वाभावेन बहिरंगत्वं नास्तीति भाष्योक्त

त्रिमासं त्रैत्यस्य सर्वाभिङः न मित्यर्थः साच समिति प्रसैव न धातुमात्रस्य तथा चैतद्व्याख्यानरोधेन तिङाद्युत्पत्तेः प्राक

धातूपसर्गसंबंधे तत्कालप्रवाद्गुणादेशः अंतरंगं तिङाद्युत्पत्तौ पदांतरसंबंधे प्राप्तसहद्विवारणार्थत्वेन आड़्

ग्रहणस्य चारितार्थ्यात्तत्कालप्राप्तिकमित्यर्थस्य साधकत्वम् तत्र पूर्वोक्तविधया तत्कालप्राप्तेरसंभवात् अंतर

वसकर्मकत्वात्कर्मणि लकारोपि सिध्यति अन्यथा साधमोत्तरमुपसर्गसंबंधे उपसर्गसंबंधात्पूर्वं सकर्मकत्वा

भावात्वात्कर्मणि लकारस्यासिद्धिरित्याशयकं केषांचिद्भ्रमं यत्वित्यादिनातूपसमनंतरोक्तभाष्यात्तरै

नैतत्सारमित्यादिसिद्धांतभाष्येण दूषयति तन्नेति कथं तर्हि कर्मणि लकारसिद्धिरित्यत आह उपसर्ग

योग्येति एवं तर्हि उपसर्गसंबंधो निरर्थक इत्यत आह पश्चादिति प्रयुक्तुं स्तथा वोधेपि श्रोतुर्येन कोपस

र्गसंबंधमंतरा तथा बोधाभावादिति तदाशयः ॥ ॥

नन्वेवं क्रुधातोरुपसर्गसंबंधात्पूर्वं साधनप्रत्यये लिटि निवायादेशो द्वित्वादौ च कृते संचस्कार संचस्करतुरित्या।
दौ नत्वेवलङादौ निवायादेश अडागमे च समस्करोत् समस्कार्षीदित्यत्र च सुडर्थकात्पूर्वः अडभ्यासव्यवायेपी
ति सूत्रपाठेन तथा कर्तव्यम् तथा सूत्रापाठे तु वार्तिकं कर्तव्यम् पूर्वं धातूपसर्गसंबंधेन इत्येतन्न वक्तव्यं भवती
ति लाघवम् तथा चैनेतत्सारमित्यादि भाष्यस्यगौरवग्रस्तत्वेन सिद्धांतत्वाभावात्कथं तदनुरोधेन तन्त्रेत्यादि
खंडनं संभवतीत्यत आह एवं चेति उपसर्गयोग्यार्थान्तर्भावेण धातुनैव तदर्थाभिधाने चेत्यर्थः तथा सति
पूर्वोपस्थितत्वं अंतर्भूतार्थकनिमित्तकत्वेन सुटोऽन्तरंगत्वम् वाह्यसाधनप्रयुक्तकार्यप्रत्ययनिमित्तकत्वेन

एवं चान्तरंगतरार्थकोपसर्गनिमित्तः सुट् संस्कृतिरित्यवस्थायां द्वित्वादितः पूर्वं प्रवर्तते ततो द्वित्वादि

द्वित्वादेर्वहिरंगत्वम् तथा चोपसर्गयोग्यार्थान्तरभावेण विशिष्टं धात्वर्थबुद्धौ कृत्वा तत्र साधनसंबंधनसंबंधप्र
युक्तकार्यप्रत्यये योगेन साध्यत्वावगतौ श्रोत्र बोधाय क्रियायोगनिमित्तोपसर्गसंत्तकशब्दप्रयोगे केवलोपसर्गनि
मित्तककार्यापेक्षया साधनसंबंधनिमित्तककार्यमंतरंगभावम् सुट् तु इतरापेक्षया पूर्वोपस्थितसाधनसंबंधापे
क्षयापि पूर्वोपस्थितिकत्वेन अंतरंगतरो यो धात्वर्थान्तर्भूतोऽर्थः सोऽर्थो यस्य एतादृशो यो उपसर्गस्तन्निमित्तकत्वादंत
रंगतरः तस्मात्संस्कृति इत्यवस्थायां द्वित्वादितः प्रागेव तत्प्रवृत्तौ सुट्कात्पूर्व इति न वक्तव्यमिति भावः एतेन संस्कृश
ब्दे व्यवस्थिते एव सुट् भवतीति कैयटोक्तं न युक्तमिति ध्वनितम् साधनप्रत्ययोत्पत्तेः पूर्वमुपसर्गसंबंधाभावाद्
न्तरंगतरार्थकोपसर्गनिमित्तकसुडागमस्य तदवस्थायामनुपपत्तेः वस्तुतस्तु कैयटस्यायमाशयः कात्पूर्वे

प॰ शे॰
११३
113

पश्चात्साधनेनेति सिद्धांतितं लुट् कात्पूर्व इति सूत्रे भाष्ये तस्यायमाशयः विशिष्टक्रियैवार्थलाभाय साधनेन संबंध्यते न त्वं
वशिष्टा विशिष्टत्वं च तस्या उपसर्गार्थमंतर्भाव्यैव च त्वनोपसर्गाकृतविशेषणासंबंधमंतरेण संबंधं भवतीत्यतः पूर्वं
तन विशेषणेन युज्यत इति अनंतरं चेतरेणैकदेशिनानेनत्सारं पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण साध
नं हि क्रियां निवर्त्तयति तामुपसर्गो विशिनष्टि अभिनिर्वृत्तस्य चार्थस्य उपसर्गेण विशेषः शक्यो वक्तुमित्युक्ते स
त्यमेवैतत् यत्वसौ धातूपसर्गयोरभिसंबंधः तमभ्यंतरं कृत्वा धातुः साधनेन युज्यते ऽवश्यं चैतदेवं विज्ञेयं यो हि म
न्यते पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेणेति आस्यते गुरुणेत्यकर्मकः उपास्यते गुरुरिति केन सकर्मकः स्या
दिति सिद्धांतिना पूर्वोक्तार्थव्यनेनैव एवं च कृत्वा लुट् सर्वेनोंतरंगतरको भवति कात्पूर्वग्रहणं प्रत्याख्यातं अ
त्र भाष्ये विज्ञेयमिति यो हि मन्यते तेनेनेति योज्यम् सर्वेन इत्यस्य धात्वनुसंज्ञाया अपि एवं चैतज्ज्ञाप्यात्साधान संबं
धात्पूर्वमुपसर्गसंबंधलाभेन साधनप्रत्ययोत्पत्तेः पूर्वं संक्र इत्यच स्थायामेव लुट् पश्चाद्धात्वनुसंज्ञायां साधनादौ
ति अध्ययनं प्रत्यय इत्यादिसिध्यर्थं क्वचित् उपसर्गसंबंधनिमित्तककार्यात्पूर्वमपि साधनसंबंधनिमित्तकका
र्यप्रवृत्तिरंगीक्रियते णेरध्ययने वृत्तं प्रत्यय इत्यादिनिर्देशात् ज्ञापकादिति न दोष इत्यन्ये ॥ ॥

॥ ॥

वस्तुतस्तु कुतो न खल्वेतदित्यादि उत्तरभाष्यानुरोधेन नाकूट इत्यादौ विसर्गवारणमवार्तिककारेणारब्धविसर्जनीयोत्तर
पदे इति वार्त्तिकप्रत्याख्यानपरं नवाबहिरंगलक्षणत्वादित्यारभ्य एवमेषोऽसिद्धो भवतीत्यन्तं तेनैकारेशीतिकल्पितं युक्तम् अ
पि तु कुतो न खल्वेतदित्याद्युक्तानुक्तरीत्याकथनेन मुग्धत्वादेतस्यैव कैरेस्युक्तित्वं प्रतीयते अथवा समासेन तु पूर्वोक्तोऽल्पविति
सूत्रस्य प्रत्ययग्रहणचुर्ग्रहणविषयभाष्यवदत्रापि कार्यकालपक्षे खरवसानयोरिति सूत्रैकवाक्यतया पूर्वत्रासिद्धमित्येत
दपेक्षया परत्वाद्विप्रतिषेधे परमिति व्यवस्था न च पूर्वत्रासिद्धेनास्ति विप्रतिषेध इति वाच्यम् पूर्वत्रासिद्धमित्येनेन स्वेन
रूपेणापेक्षयास्वेन रेफस्यासिद्धत्वप्रतिपादनेऽपि स्वापेक्षया परस्य पूर्वापेक्षयासिद्धत्वप्रतिपादने आत्माश्रयात् मानाभा
वाच्च नत्वास्य प्रयत्नं सवर्णमित्यादावत्र लोकसिद्धस्य यदेकपदार्थबोधमात्रेण वाक्यार्थबुद्धौ न स्वापेक्षा नेह तथा नास्ति किं
च नैतदत्र च सर्वं मिथ्यात्वप्रतिपादने नान्यथानुपपत्त्या स्वात्ममिथ्यात्वप्रतिपादनेऽपि दोषः अन्यथा स्वातिरिक्तत्वेन श्रुतिः सं
कोचनीया स्यात् संकोचे च प्रमाणाभावः नैवं तथाविधान्यथानुपपत्तिरत्रास्ति किं च श्रुत्यग्राहकदृष्टत्वाविशेषात्।
श्रुतेरपि मिथ्यात्वे बाधकाभावान्न किंचिदत्र वक्तव्यमस्ति इमामेव परत्वाद्व्यवस्थां मनसि निधाय कुतो न खल्वेतदित्याद्यु
क्ता अतः किमिति पृष्टे अतः युक्तः परिहारो न वा बहिरंगलक्षणत्वादित्युक्तम् अन्तरंगस्य परत्वादित्यर्थः अयुक्त इ।
ति पदच्छेदस्तु प्रमाणाभावव्याहतः प्रत्यक्षशास्त्रस्य आनुमानिकवचनेन न्याय्य इति तु न युक्तम् न हि प्रत्यक्षसिद्धशास्त्रे
णा बाधे क्लृप्तवचनेनैवोपपत्तौ आडुंबरीन्यायेन तत्परित्यागपूर्वकं नान्तरकल्पनमपि न्याय्यम् शिष्टाकोपे विरुद्धमिति
न्यायेनानुमानिकवचनस्य बलवत्सहकारितया औडुंबरीन्यायानवतरात् प्रत्यक्षसिद्धस्य मनुमानिकेन वचबाध।
स्य न्याय्यत्वात् सदृशार्थन्यायात् प्रथमाध्यायस्य तृतीयपादे पूर्वमीमांसायाम् तत्र हि अर्वन्तेनकर्त्तव्यं इत्यादिस्मृत्यु
क्ता अचमनादयः पदार्थाः वेदं कृत्वा वेदिं करोतीत्यादिश्रुत्युक्तक्रमादिभिर्बाध्यन्ते न वेह हि विचारे प्रसक्तेः प्रमाणाव।

लावलविचारे क्रियामाणे श्रुतिरूपस्य निरपेक्षत्वेन सापेक्षस्मृत्यपेक्षया बलवत्त्वेन श्रुत्युक्तक्रमादिभिः स्मृत्युक्ता आचमनादयो बाध्यं।
तएवेतिप्राप्ते प्रमाणबलाबलात्प्रमेयबलाबलस्य ज्यायस्त्वात्प्रमेयबलाबलविचारे स्मृत्युक्ता आचमनादीनां प्रमेयानां स्वयं पदार्थभू
तत्वात् पदार्थधर्मभूतश्रुत्युक्तक्रमाद्यपेक्षया बलाबलत्वेन सापेक्षताया अपि स्मृतेर्बलवत्प्रमेयभूतपदार्थाश्रितत्वेन बलवत्तानि
रपेक्षताया अपि श्रुतेश्च दुर्बलपदार्थधर्मक्रमाद्याश्रितत्वेन दुर्बलत्वात्तन्नत्वेन दुक्ताचमनादीनां श्रुत्युक्तक्रमादिभिर्बाधा अपितु स्मृत्यु
क्तावमानादितिभिरेव तदुक्तक्रमादीनां बाध इति सिद्धान्तः शिष्टाकोप इति त्वधिकरणपूर्वपक्षसूत्रम् तदर्थस्तु शिष्टायाः श्रुतेः
अकोपे अविरोधे अविरुद्धं स्मृत्युक्ताचमनादिकं कर्तव्यमिति चेन्न शास्त्रपरिमाणत्वात्क्रमस्य शास्त्रपरिच्छिन्नत्वात् तथा शास्त्रप
रिच्छिन्नं हि क्रमं आचमनादयो बाधेरन्निति यावत् एवं च प्रकृते पि अपि पूर्ववचनविरहसहकृतबलकल्पत्वाश्रितत्वेनानु
मानिकस्यापि वचनस्यापि पूर्ववचनसहकृतदुर्बलत्वाश्रितप्रत्यक्षसिद्धशास्त्रापेक्षया बलवत्त्वं बोध्यम् एवं सति संयोगां
तस्य त्रस्यं बहिरंगलक्षणाहृतिवार्त्तिकं तद्भाष्यं च संगच्छते रदाभ्यां निष्ठातो नः इति सूत्रे हलि निमित्तान्न निषेध इति वार्त्तिकस्य का
र्तिः इत्यादि सिध्यर्थं न वा बहिरंगलक्षणत्वादिति भाष्यम् मादुपधायाश्चेति सूत्रे न्तमनोदयन्त्यनार्मेन इत्यत्र वत्वाव्याप्त्य
र्थं नामेतेः प्रतिषेध इति वार्त्तिकप्रत्याख्यानाय नामेतेर्टस्युक्तं न वा बहिरंगलक्षणत्वादिति भाष्यम् अट्कुप्वाङ् इति सूत्रे
अकारात्परस्य नकारस्याप्त्यर्थं तु धादिषु न्तममनशब्दपाठो ज्ञापक इत्युक्ता अनंतरेनानम इत्यत्र विध्यर्थं तत्पाठस्य चा
रितार्थ्याशंकायां बहिरंगात्वद्धिः अनंतरंगत्वं असिद्धं बहिरंगमंतरंगे इत्युत्तरभाष्यं च अन्यथा एतद्भाष्यचतुष्टय।

॥ मय्यप्युक्तं स्यादित्यर्थः लंपल्लविनेन ॥ ॥

उक्तार्थमेवद्रढीकर्त्तुमाह अतएवेति अन्यथाप्रूर्वधात्वुपसर्गसंबंधेप्युक्तःपूर्वमेवांतरंगत्वात्तन्निमित्तकणत्वेप
रंगामेतिपरिभाषयाभाष्यकृतासमाधानमनुपपन्नंस्यादितिभावः ननुणत्वस्यत्रैपादिकत्वात्तस्यसम्पप्येनरंग
त्वेपरिभाषाया अप्रवृत्त्यात्तः पूर्वमेवयुगागमेभाष्यस्यसामंजस्यात्तविरोधः एकदेशिमताभिप्रायेणतथो
क्तेरदोषात् इदानींभाष्यसंमतिवत्सूत्रसमतिमपिस्तचयितुमाह अतएवेति विपत्तेबाधकमनुपपत्यस्यति अ
न्यथेति नन्वेवंसाधननिमित्तककार्यस्यैवांतरंगत्वे उपसर्गनिमित्तकार्यस्यांतरंगत्वंक्वापिनस्यादतस्तदेवव्य

अतएवप्राणिदापयतीत्यादौणत्वंयदागमेतिन्यायेनसमाहितंभाष्ये अतएवप्रत्येतिप्रत्ययइत्या
दिसिद्धिः अन्यथांतरंगत्वात्सवर्णदीर्घेरूपासिद्धिः यदुपसर्गनिमित्तकंकार्यमुपसर्गार्थाश्रितं
विशिष्टोपसर्गनिमित्तत्वादंतरंगम् यत्तुनतथातत्रपूर्वागतसाधननिमित्तकमेवांतरंगम् ॥ ॥

वस्थापयितुमाह यदिति नह्येवंसत्युपसर्गनिमित्तकार्यमात्रस्यांतरंगत्वंनास्तीतिक्रमः अपितुकेवलश
ब्दत्तउपसर्गनिमित्तकस्यतन्नेतीति तथाचयच्चोपसर्गतदर्थैतदुभयनिमित्तकंतद्विशिष्टोपसर्गनिमित्तकत्वा
त्साधननिमित्तककार्यापेक्षयाप्यंतरंगंयथास्थडादि यच्चकेवलशब्दतउपसर्गनिमित्तकंनतदंतरंगम् यथा
णत्वादि अपितुतत्रसाधननिमित्तकमेवांतरंगमितिविवेचनीयमितिभावः । ॰

नधातुलोपेतिसूत्रस्यभाष्यंसंमतिमाह अतएवेति विशिष्टोपसर्गनिमित्तकत्वस्यासत्तिकार्यसाधननिमित्तकार्यस्यैवांतरंगत्वादे
वेत्यर्थः अन्यथाप्रेद्ध इत्यत्रगुणोवहिरंगइत्युक्तिरयुक्तास्यात् तत्रशब्दैनः उपसर्गस्यनिमित्तत्वेनतत्त्वासंभवादितिभावः एवंचापूर्वोक्ता
तिरिक्तस्थले उपसर्गसंबंधापेक्षयापूर्वंसाधनसंबंधेसाधननिमित्तककार्यमेवांतरंगमुपसर्गसंबंधस्तुसाधनसंबंधोत्तरमेवेतिनियम
इतिसिद्धंभवति विपक्षेउपपदमतिङितिसूत्रस्यभाष्योक्तबाधकमुपन्यस्यतिकिंचेति तत्रहि एवंतर्हिसिद्धेसतियदतिङितिप्रतिषेधं
शास्तितज्ज्ञापयत्याचार्यःसुप्सुपेतिनिवृत्तं सुप्सुपेतिज्ञापनानंतरंकिमेतस्यज्ञापनेप्रयोजनं गतिकारकोपपदानांकृद्भिःसमासवच
नंप्राक्सुबुत्पत्तेरितिपरिभाषानकर्तव्याभवतीत्युक्तामयेतज्ज्ञाप्यतेकेनेदानींसमासोभविष्यतीतिष्टेष्टसमर्थेनेत्युत्तरितेयद्येवं

११५

115

अतएवनधात्वितिसूत्रेप्रेद्ध इत्यत्रगुणोवहिरंगइतिभाष्येउक्तम् किंचपूर्वमुपसर्गयोगेधातूपसर्ग
योःसमासेएकस्वर्याद्यापत्तिरित्युपपदमितिसूत्रेभाष्येस्पष्टम् ॥ ॥

धातूपसर्गयोरपिसमासःप्राप्नोतिपूर्वंधातुरुपसर्गेणयुज्यतेअनंतरंसाधनेनइत्याशंकायांनैतदस्तिपूर्वंधातुःसाधनेनयुज्यते
अथाद्युपसर्गेणेत्युक्तम् यद्यपिभाष्येसमासःप्राप्नोतीत्येवोक्तम् नतेकस्वर्यादि तथापियद्येवमितिप्रतीकमुपादायनत्वेकस्वर्या
दिप्रसंगइतिकैयटोक्तमेवतद्बोध्यम् स्तुतस्तुपूर्वंधातुःसाधनेनेतिकाचित्कंज्ञापकमुत्तमेव अन्यथासुट्कात्पूर्वइत्यस्यातिसू
त्रस्यपूर्वोक्तभाष्येणविरोधः तत्रत्यसाधनंहिक्रियांनिर्वर्तयतीत्याद्युक्तिस्तुपूर्वोक्ताशयमजानतएकादेशिनइतित्वत्रबो
ध्यमित्यन्ये ॥ ❁ ॥

नन्वपूर्वंधातुः साधनेनेत्यत्रसाधनशब्दः कारकवाचकः तथाचकारकवाचकप्रत्ययस्यैवपूर्वंधातुनासं
बंधइतितस्मात्प्रतीतेर्भाववाचकप्रत्ययसंबंधात्पूर्वंउपसर्गस्यधातुसंबंधेऽध्ययनमित्यादिनसिध्येदित्यत
आह भावार्थप्रत्ययस्येति अत्रसाधनेनेत्युपलक्षणमितितदाशयः किमत्रप्रमाणमित्याकांक्षायांसूत्र
स्य अध्ययनेतिनिर्देशःप्रमाणमितिबोधयितुमाह अतएवेति ननुएवमपिनिर्देशस्यसजातीयापेक्षत्वे।

भावार्थप्रत्ययस्यापिपूर्वमेवोत्पत्तिरतएवणेरध्ययनेवृत्तमितिनिर्देशःसंगच्छते इदंचसामा
न्यापेक्षंज्ञापकंभावतिङोपिपूर्वमुत्पत्तिः अन्यथातत्रसमासापत्तिस्तिङि.त्वतिङि.तिनिषेधात्र
दोषः पदिभावपिङ्युपसर्गयोगोस्तीत्यलंबहुना ॥ ॥

तेनभावकृदंतेनतथादोषवारणेपिभावतिङंतेउपेक्ष्यते इत्यादौतथादोषस्तदवस्थएवेत्यतआह इदंचेति।
विपक्षेबाधकंदर्शयन् तदुपयोगमाह अन्यथेति ननुसत्यपितिङि.समासःकुतोनेत्यतआह तिङि.त्विति
वस्तुतस्तुतस्यविशेषापेक्षज्ञापकत्वेपिनदोष इतिध्वनयितुमाह पदीति पदीत्यनेनभावतिङ्युपसर्गयो
गएवनास्तीतिध्वनितेपिदोषाभावोपिध्वनितएवेतिबोध्यम् ॥ ॥ ॥

इदानीं विशेषापेक्षं बहिरंगं सामान्यापेक्षमंतरंगमिति प्राचीनोक्तपारिभाषिकांतरंगबहिरंगदार्थं खंडयितुं तन्मतमनुवद।
ति एवमित्यादिना विशेषापेक्षं बहिरंगमित्यस्यायंभावः विशेषो हि व्याप्यधर्मस्तस्य व्यापकधर्मनांतरीयकत्वेन तद्धर्मोप।
स्थितौ तदुपस्थितेः अधिकनिमित्तापेक्षत्वात्तत्वम् यथा रुधादिभ्यः सार्वधातुके श्नम्प्रधातुविहितप्रत्ययसंज्ञकनिङ्गा
देः सार्वधातुकसंज्ञाविधानाद्व्याप्यसार्वधातुकत्वरूपधर्मोपस्थितौ प्रत्ययत्वरूपव्यापकधर्मस्याप्युपस्थिते एवश्यक।

यत्तु विशेषापेक्षात्सामान्यापेक्षमंतरंगं विशेषापेक्षे विशेषधर्मस्याधिकस्य निमित्तत्वात् यथा रुधा
दिभ्यः सार्वधातुके श्नम् रुदादित्वं सार्वधातुकत्वं च तत्र सार्वधातुकत्वज्ञानाय प्रकृतेर्धातुत्वज्ञा
नं प्रत्ययत्वज्ञानं चावश्यकमिति पास्फुडंतरंगः एतेन पदनुदात्तङितिश्नसिद्धेरैकेपदेनोक्तं लमा
नपेक्षपातरंगास्तिवादय इति लकारविशेषापेक्षत्वाद्बहिरंगाः स्यादय इति तत्परास्तम् विशे
षापेक्षत्वेपि तस्य सामान्यधर्मनिमित्तकत्वाभावेन तत्वस्यडरूपपादत्वात् ॥

त्वाद्रुदादित्वरूपविशेषोपस्थित्या तज्ज्ञानाय धातुत्वरूपसामान्यधर्मस्योपस्थितेरप्यावश्यकत्वाच्च पास्फुडपेक्षपा।
अधिकधर्मनिमित्तत्वेन बहिरंगं एतावता वह्नापेक्षं बहिरंगमिति फलितमिति सामान्यापेक्षमंतरंगमित्यस्यत्वयंभावः ॥
सामान्यधर्मस्य व्यापकधर्मत्वेन तस्य व्याप्यस्याधिकरणातिरिक्ताधिकरणकत्वस्यापि सत्वादुपस्थितौ व्याप्यधर्मोपस्थिते
रनियतत्वेन अल्पधर्मनिमित्तकत्वाया स्फुडंतरंग एतावताऽल्पनिमित्तमंतरंगमिति फलितं भवतीति

२१६

परनिमित्तकत्वेनसादीनांबहि इदंचशास्त्रमर्यादयातथाविधांतरंगबहिरंगालाभात्माकृतेविडितमपियथाकथंचिदस्तु
पेत्यतदिदानीखंडयति नत्वेति ननुयथातत्वप्रत्ययत्वेतङमयस्थानमंतरासार्वधातुकत्वस्थानान्यथानुपपत्यासामा

परनिमित्तकत्वेनसादीनांबहिरंगत्वाच्चेति नत्र विशेषस्यव्याप्यत्वेनव्यापकस्यानुमानेनोपस्थितावपि
तस्यनिमित्तकत्वेमानाभावेनाधिकधर्मनिमित्तकत्वानुपपादनात् भाष्येएवंविधांतरंगबहिरंभाव।
स्यक्वाप्यनुल्लेखाच्च यत्तुमतुप्सूत्रेभाष्येपंचगावोयस्यसंतिपंचगुरित्यत्रमतुप्प्राप्नोतीत्याशंक्यप्र
त्ययकमसामर्थ्यात्समुदायादप्रातिकत्वात्समासात्समासेनोक्तत्वादितिसिद्धांतितेनेनत्सारमितुक्तेहि
त्र्यन्यपार्थेउपपद्यतेद्विगोस्तद्धितोयथापांचनापितेरितिपूर्वपक्षोक्तिभाष्येद्विगोर्लुगनपत्यइतिलु
ग्विधानात्तद्धितेऽर्थात् द्विगोस्तद्धितोभवतिपंचगुशब्दस्यद्विगुरितितदाशयंकैयटः ननेद्वैमातुरःपां
चनापितःपंचसुकपालेषुसंस्कृतइत्यादौसावकाशद्विगोर्बहुव्रीहिणाप्रसक्तेनबाधइत्याशयेननैष
द्विगुःकस्तर्हिबहुव्रीहिरितिसिद्धांतितेनोक्तेतमवकाशमजानतोऽपवादत्वात् द्विगुःप्राप्नोतीतिपू
र्वपक्षी अन्यपदार्थेसर्वंतमात्रस्यविधीयमानोबहुव्रीहेःसंख्यायास्तद्धितार्थेविधीयमानोद्विगुर्विशे
षविहितत्वाद्बाधकःप्राप्नोतीतिकैयटः

न्यधर्मस्यनिमित्तत्वसंभवेनमानाभानाभावइत्युक्तमित्यतआह भाष्येइति यासुट्तुनित्यत्वाद्भवतीतितदाशयः

प॰ शे॰
–
११७
117

ननुमतुसूत्रेभाष्येभाष्यकृतैवतथाविधांतरंगवहिरंगभावस्याश्रयणाद्भाष्येएवंविधेत्याद्युक्तिरयुक्तेत्यतमनुसूत्रस्थ
भाष्यंयत्विष्यादिनान्त्यएवंविधांतरंगबहिरंगभावेतस्यैकदेशत्वेनसाधकत्वंदूषयति नैषेति तस्यसिद्धांतियुक्तित्वाभावेहे।
तुमाह एतावतायपवादत्वहानेरिति एवंविधांतरंगत्वेपितदये तयाअपवादस्यवलीयस्त्वादपवादत्वेनवाधकत्वमत्ततेमे
वेतिनतदुपर्यंतरंगत्ववर्णनंमुक्तमितिभावः सामान्यापेक्षविशेषापेक्षांतरंगगवहिरंगभावसत्वेपितमौदग्य कोपएा। ना

ततःसिद्धांत्येकदेश्याह अंतरंगत्वाद्बहुव्रीहिःकांतरंगता अन्यपदार्थेबहुव्रीहिः विशिष्टेऽ
न्यपदार्थेद्विगुः तस्मिंश्चासत्यतद्धितेत्विग्रहणंक्रियइति अधिकाल्यर्थायेत्तमन्वर्थेनिमि
त्तकोद्विगुर्वहिरंगइतिकेमतः नैषासिद्धांतयुक्तिरेतावतायपवादत्वाहानेरचसामान्यापे।
क्षयणोविशिष्टसवर्णजपेक्षदीर्घेणवाधदर्शनात् किंचोक्तरीत्यापरत्वेनैववाधसिद्धेः

विश्रकः सवर्णेदीर्घइत्यादौअपवादत्वेनबाध्यबाधकभावदर्शनस्येहतेहेतुत्वेनोपपादयति अचसामान्येति ॥
नन्वपवादत्वमप्युक्तम् पंचतापितिरित्यादौसाचकाशस्योक्तत्वात् एवमपिपरत्वेनैववाधसिद्धेः अंतरंगपर्यंतंधावनं
व्यर्थभवेदित्याह ॥ ॥

१८

नन्वेवमपि एतद्भाष्यस्य एकदेशयुक्तत्वं परत्वेनैव स्वर्वैास्थितिकेनबाधसिद्धौ चांतरंगत्वपर्यंतं धावनं किमितीत्येनावैने
ववाच्यम् तन्नयुक्तं पुराऐपेक्षयाश्रयत्रांतरंगवलवत्वस्य दृष्टत्वेन न दुक्तत्वे पित्तनिद्धिरहात् वहिपरत्वांरंगत्वोभयस्यैक
वलवत्वनियामकत्वेन दृष्टत्वे स्वर्वोपस्थितिकत्वान देव वक्तव्यं नान्यत्रवलनत्वेन दृष्टत्वादंतरंगत्वमिति कुलधर्मोलि
अतएवैनदस्युपेत्यैवयदि तस्संनिप्रसंगाः संनितद्विधावल्लिग्रहणं किंने वहुव्रीहावप्यल्लियग्रहणं क्रियते अस्तिय

किंचाधिकापेक्षत्वेनैव वहिरंगत्वं न केवलविशेषापेक्षत्वेनेति नैतद्भाष्यारूढं विशेषापेक्षस्य वहिरं
गत्वम् अतएव स्त्वंतसामान्यापेक्षो वहुव्रीहिस्तद्विशेषापेक्षो द्विगुरितिनोक्तं भाष्ये नचार्य्यक्तन
वहिरंगत्वस्यानाश्रयणादिदमयुक्तम् एकदेशयुक्तित्वेनादोषात् ॥ ॥ ॥

क्तायथास्यादनंतरादियुक्तान्माभूदित्युक्तं तस्मात्यत्किंचिदेतदित्यस्वेराह किंचेति एवमप्यस्माद्भाष्यादधिका
पेक्षत्वं वहिरंगत्वमित्येवापातित न केवलं विशेषापेक्षत्वमित्यतद्भाष्यारूढं तद्दूषितमस्माभिः प्राक् एतस्यैतद्भाष्या
रूढत्वमेव साधयति अतएवेति ननु भवदनभिमतार्थक्तत वहिरंगत्वाश्रयणादेवैतद्भाष्यमयुक्तमितितद
स्याशंकानचेत्यादिनाशंक्यपरिहरति एकदेशयुक्तित्वेनेति ॥ ॥ ॥

अत एवेति भवदभिमतवहिरंगत्वस्याश्रयणादेवेत्यर्थः पुनः स्वाभिमतमेवार्थं इच्छपति अत एवेति ध्वनितः पादःपदिति
सूत्रस्य भाष्यकैयटयोरपि संमतिमाह पादःपदिति तत्र हि निर्दिश्यमानपरिभाषाप्रयोगेनावसरे अरुदितामित्यादौ इटि
कृते सेटकस्यतां तं तमादेशाः प्राप्नुवंति निर्दिश्यमानस्यादेशा भवंतीति न दोषो भवतीत्यादि इदमिह संप्रधार्यं इटक्रियतां तांतेन
मइति किमत्र कर्तव्यं परत्वादिडागमइत्युक्ते: अंतरंगाःतांतेनामइत्युक्तं भाष्ये अंतरंगाइति प्रतीकमुपादाय प्रास्लादेशेभ्यो धा
त्वधिकारात्तामादयोंतरंगाइति कैयटः तथाहि इदं भाष्यं प्राग्लादेशेभ्यो धात्वधिकार इति पक्षमादाय प्रवृत्तमन्यथा निर्दिश्य

अत एवास्मिन्ग्रहणं नोपाध्यर्थं किंतु प्रक्लिशब्दात्मन्त्वर्थमिति त्वदभिमतं वहिरंगत्वमपद्विगोर्नास्ती
ति प्रतिपाद्य सिद्धांतिनामत्वर्थे द्विगोः प्रतिषेधो वक्तव्य इति वचनेनैव तत्सिद्धमित्युक्तम् अत एव तदो
सःसावनंत्ययोरिति सूत्रे नंत्ययोरिति च रितार्थं अन्यथा प्रत्ययसामान्यापेक्षत्वेनांतरंगत्वादं त्यस्याप्य
तेद्धेयर्थं स्पष्टमिव पादःपदिति सूत्रे भाष्ये कैयटयोरप्येतदंतरंगत्वाभावापवसूचितइतिसुधियो

मानस्येत्युक्तेपि धातोरित्यवधुपादानादिशेष्यवधारणेनेनतामादय एव नस्युः तथाच रुदादिभ्यः सार्वधातुके इत्यस्य तामादि
निमित्तसमुदायवहिर्भूतरुदादिनिमित्तकत्वेन वहिरंगत्वात्तामादय एव भवंतीति सूचनात्सामान्यापेक्षमंतरंगं विशेषापेक्षं तु व
हिरंगमिति नास्त्येवेति सूचितम् कैयटेन च प्राग्लादेशेभ्य इत्युक्तौ वसूचितम् अथालादेशादीनां तदधिकारत्वेप्युक्तांतरंगत्वा
संभवात्तदुक्तिरयुक्तास्यादेत् वस्तुतस्तु पादःपदिति सूत्रे कैयटेप्येतदंतरंगत्वाभावसूचितइति वक्तव्यम् नहि विचार्यमाणे
तथाविधांतरंगत्वाभावसूचने भाष्यप्रमाणं भवितुमर्हति भाष्यस्योभयथापि सामंजस्यात् अत्रेदं वोध्यम् इत्थं हि मतप्सूत्व

दिपकाका॰
प॰शेषस्य ॰

तथाहि अथाह इह कः स्यान्न भवति पंचगावः संप्रस्य पंचगुः दशगुरिति प्रत्येकमसामर्थ्यात्समुदायादप्राप्तिपदिकत्वात्समासात्समासेनो
क्तत्वात् नेत्याह उक्तेऽपि समत्यार्थे उत्पद्यते तद्धितः तद्यथा पांचनापितिरिति नैषद्विगुः कस्तर्हि बहुव्रीहिः अपवादत्वाद्द्विगुः प्रा
प्नोति अंतरंगत्वाद्बहुव्रीहिर्भविष्यति कान्तरंगता अन्यपदार्थे बहुव्रीहिरिति वर्तते विशिष्टे अन्यपदार्थे तद्धितार्थे द्विगुः तस्मिंश्चास्य
तद्धिते लुग्ग्रहणं इति क्रियते तस्माच्चान्तरंगत्वादित्यादिभाष्याद्बह्वपेक्षं बहिरंगमल्पापेक्षमंतरंगमित्यायाति अर्थकृतं बहिरंगमि
त्यायाति ननु नैषा सिद्धान्तयुक्तिरिति चेत् नेहि तत्र वेप्येतदर्थमप्युपेत्यैव सतिप्रसंगे उभयत्राप्यलुग्ग्रहणं तदभावे उभयत्राप्यलु
ग्ग्रहणं नेत्युक्तात्रस्तेरलुक्तिना सामानाधिकरण्याभावादलुक्शङ्कान्मतु अप्रत्यया प्राप्तो विध्यर्थमलुग्ग्रहणं नोपाध्यर्थमिति व्यवस्थाप्य उ
भयोः सामानकत्वे स्वीकृते तस्माद्द्विगोर्लुग्द्वितस्य प्रतिषेधो वक्तव्य इति वचनमंगीकुर्वता भाष्यकृता सोऽर्थोऽङ्गीकृत एवेति न हानिः नच
